त्रिहस्तमात्रं रचितं कुर्यान्नागफणान्वितम् । रोपयेदेकहस्तेन गर्भे होमं प्रयोजयेत् ॥५
लाजासंयुक्तविधिना विश्वेषामिति सञ्जपन् । नागाधिपतये तद्वदच्युताय तृतीयकम् ॥६
भौमायेति चतुर्थं च ततो यूपं निवेदयेत् । मयि गृभ्णामीति सम्पूज्य यूपं च रुद्रदैवतम् ॥७
सम्पूज्य रुद्रं पञ्चाङ्गं धान्यं वस्त्रं च दक्षिणाम् । आचार्याय तथा होत्रे अन्येषामिष्टदक्षिणाम् ॥८
गोप्रचारे च शैलेयं यूपं हस्तद्वयान्वितम् । पञ्चशीर्षान्वितं कुर्याद्धस्तमात्रं प्ररोपयेत् ॥९
यूपं च चैत्रवृक्षं च कुण्डलीमठपीठिकाम् । संस्पृश्याचम्य वै विप्राः प्राणायामेन शुध्यति ॥१०
चतुर्हस्तप्रमाणेन शतकुण्डेन सम्मितम् । तदर्धं च कनिष्ठेन अष्टकाष्टाधिकं भवेत् ॥११
भूमौ रत्नं च संस्थाप्य इमं मन्त्रमुदाहरेत् । शिवलोकस्तथा गावः सर्वदेवसुपूजिताः ॥१२
गोभ्य एषा मया भूमिः सम्प्रदत्ता शुभार्थिना । एवं निवेदयेद्यस्तु गोप्रचारं समाहितः ॥१३
स मुक्तः सर्वपापेभ्यो विष्णुलोके महीयते । यावन्ति तृणगुल्मानि सन्ति भूमौ शुभानि च ॥१४
तावद्वर्षसहस्राणि स्वर्गलोके महीयते । पूर्वे सीमां निबध्नीयात्कृत्वा वृक्षस्य रोपणम् ॥१५
सेतुं कृत्वा दक्षिणतः पश्चिमेऽङ्गाररोपणम् । उत्तरे खानयेत्कूपं तस्य सीमां न लङ्घयेत् ॥१६
ततः सहस्रधारां च शस्येन परिपूरिताम् । प्रदद्याद्वा ततो विप्राः सर्वपापैः प्रमुच्यते ॥१७
नगरग्रामपूर्वे वा उत्तरे पश्चिमेऽपि वा । न कुर्यादग्निदिग्भागे दक्षिणां वा ततः शुभाम् ॥१८

---

।१-४। तीन हाथ की नाग के फल की भाँति उसकी रचना करके एक हाथ गर्भ के भीतर प्रविष्ट करने के उपरांत हवन कर्म प्रारम्भ करना चाहिए, 'विश्वेषामिति' इसका उच्चारण करते हुए लावा मिश्रित की आहुति विधान पूर्वक नागाधिपति, अच्युत और भौम के लिए प्रदान करके 'मयि गृभ्णामिति' इस मंत्र के पूजन करके और आहुति उस रुद्र देवता वाले यूप के लिए समर्पित करनी चाहिए ।५-७। पञ्चांग समेत

गोप्रचारं खनेद्यस्तु वाहयेद्वा कथञ्चन । कुलानि पातयत्याशु ब्रह्महत्याञ्च विन्दति ।।१९
स्वर्गं नयति गोचर्म सम्यग्दत्तं सदक्षिणम् । यावत्तृणानि तद् भूमौ सप्तसंख्यानि संख्यया ।।२०
तावत्कालं वसेत्स्वर्गे विष्णुलोकान्न तच्च्युतिः ।।२१
महायागावसाने च यो न तर्पयति द्विजान् । निरर्थकं तस्य कर्म प्रयासफलमात्रकम् ।।२२
वृषोत्सर्गावसाने तु प्रदद्याद्यो महीं द्विजाः । न याति विप्राः प्रेतत्वं तस्माद्विप्रादमत्सराः ।।२३
तत्र मानं पृथक्चैव शृणुतात्र समागताः । अमानेन ददेद्यस्तु नरकं याति रौरवम् ।।२४
गवां शतं वृषश्चैको यत्र तिष्ठत्ययन्त्रितः । तद् गोचर्मेति विख्यातं दत्तं सर्वाघनाशनम् ।।२५
गोप्रचारस्य देवस्य ब्राह्मणस्य च भो द्विजाः । यावत्कालावधेः सीमा अतीते नास्ति पातकम् ।।२६
मण्डपं पूजयेत्सूर्यं वासुदेवसमन्वितम् । होमस्तिलगुडाभ्यां च अष्टावष्टौ पृथक्पृथक् ।।२७
देहि मेति च मन्त्रेण विन्यसेन्मण्डपोपरि । यत्नसिद्धं ततः कृत्वा शुक्लं घटचतुष्टयम् ।।२८
समुत्सृजेज्जपेत्पश्चात्सौरं सूक्तं च वैष्णवम् । वटपत्रे तु संलिख्य चित्रं निर्माय वा पुनः ।।२९
दिक्पालान्संन्यसेत्स्वासु स्वासु दिक्षु विचक्षणः । बद्धाञ्जलिः पठेन्मन्त्रानिन्द्रादीनां यथाक्रमम् ।।३०
धर्मसंस्थापनार्थाय आत्मनो विभवाय च । वज्रहस्तो महेन्द्र त्वं धर्मतस्त्रातुमर्हसि ।।३१
भो वह्ने मेषवाहस्त्वं चतुःशृङ्गविराजित । अनाथं मण्डपं त्वं हि धर्मतस्त्रातुमर्हसि ।।३२
यम त्वं दक्षिणाशेष महामहिषवाहन । अनाथं मण्डपं त्वं हि धर्मतस्त्रातुमर्हसि ।।३३

---

नाश हो जाता है, और उसे ब्रह्म-हत्या का दोष भागी होना पड़ता है। दक्षिणा समेत गोचर्म के समान भूमि का दान करने से भी स्वर्ग प्राप्ति होती है, उस भूमि में जितने दिन हरियाली रहती है, उसके सात

मञ्चस्थो राक्षसेन्द्रस्त्वं खड्गपाणिर्महाबलाः । अनाथं मण्डपं त्वं हि धर्मतस्त्रातुमर्हसि ॥३४
वारिराट् ध्वजहस्तोऽसि पवनो मृगवाहनः । अनाथं मण्डपं त्वं हि धर्मतस्त्रातुमर्हसि ॥३५
धनाध्यक्षो गदाहस्तः पिङ्गाक्षो नरवाहनः । अनाथं मण्डपं त्वं हि धर्मतस्त्रातुमर्हसि ॥३६
आदिदेवोऽसि देवानां कर्ता हर्ता महेश्वरः । अनाथं मण्डपं त्वं हि धर्मतस्त्रातुमर्हसि ॥३७
अनन्तो नागराजो यो धरामुद्धृत्य तिष्ठति । अनाथं मण्डपं त्वं हि धर्मतस्त्रातुमर्हसि ॥३८
चतुर्णामेव वर्णानां स्थित्यर्थं मृगपक्षिणाम् । प्रीतये वासुदेवस्य एवं मण्डपमुत्सृजेत् ॥३९
भग्ने स्तम्भे तृणे जीर्णे पुनस्तृणप्रदापने । स्थापने च तथैवास्य प्रतिष्ठा स्याद्यथाक्षया ॥४०
घातापायादिदोषेण म्रियन्ते यदि जन्तवः । प्रतिष्ठायां कृतायां तु धर्मो मे स्यान्न पातकम् ॥४१
मानुषाः पशवो ये च निवसन्तीह मण्डपे । स्वस्ति चास्तु सदा तेषां त्वत्प्रसादात्किल प्रभो ॥४२
ततस्त्रिगुणसूत्रेण सुत्रामाणेति वै ऋचा । सप्तधा वेष्टयित्वा तु दक्षिणां सम्प्रकाश्य च ॥४३
उपानहौ तथा छत्रमाचार्याय निवेदयेत् । मण्डपे भोजयेद्विप्रांस्तेषां दद्याद्यथेप्सितान् ॥४४
दीनेभ्यश्च पृथग्दद्याद्गृहं विप्रपुरःसरम् । प्रविशेत्तूर्यघोषेण प्रकुर्याच्च गृहार्चनम् ॥४५
एवं प्रपायां विज्ञेयो विशेषो वरुणं यजेत् । वासुदेवेन सहितं साङ्गोपाङ्गं सदक्षिणम् ॥४६
स्थालीपाकविधानेन प्रकुर्याद्देशिकोत्तमः । आचार्याय गृहं दद्यात्परिच्छदसमन्वितम् ॥४७

---

मञ्च पर स्थित, हाँथ में खड्ग लिये महाबली राक्षसेन्द्र ! आप भी इस अनाथ मण्डप की धर्मतः रक्षा कीजिये, हाथ में ध्वजा लिए जलाधिनाथ और मृगवाहन वायु देव ! इस अनाथ मण्डप की आप रक्षा कीजिए । हाथ में गदा लिये, पिंगल नेत्र, एवं मनुष्य वाहन वाले धनाधीश्वर कुबेर ! आप इस अनाथ

ऋत्विजे ताम्रपात्रं च जलपूर्णं च धान्यकम् । दिक्पालान्द्वारदेशे तु कूपयागे विशेषतः ॥४८
ब्रह्माणं नागराजानं द्वारपालौ च पश्चिमे । यजेन्मन्त्रैः पृथग्देवान्मन्त्रैरेभिर्यथाक्रमम् ॥४९
बलिदानं विधानेन कृत्वा दद्याद्यथाविधि । पताकानामतस्तत्त्वं प्रवक्ष्यामि यथाक्रमम् ॥५०
वज्री च धूमली कृष्णा पीता चैवाथ वारुणी । शीघ्रा गौरी उमा चैव पीता शुक्ला प्रकीर्तिता ॥५१
कुम्भेषु पूजयेद्देवान्महेशं प्रथमं बुधः । ग्रहांश्च मध्यकलशे ब्रह्माणं च ततः परम् ॥५२
वेदिकापूर्वभागे तु उत्तरे कलशे शिवम् । दक्षिणे कलशे विष्णुं कर्णिकायां जलेश्वरम् ॥५३
कलशे विधिवद्भक्त्या उपचारैः पृथग्विधैः । सम्पूज्य वटपत्रे च नागान्संलिख्य नागजैः ॥५४
ये नागास्तान्प्रवक्ष्यामि अनन्तो वासुकिस्तथा । तथा कर्कोटकश्चैव पद्मश्च कुलिकस्तथा ॥
पद्मश्चैव महापद्मो मन्त्रैरेभिः पृथक्पृथक् ॥५५
पुण्डरीकदलाभास शुभकर्णान्तलोचन । फणासहस्रसंयुक्त शङ्खाब्जकृतलोचन ॥५६
अनन्त नागराजेन्द्र इहागच्छ नमोऽस्तु ते । सित कुन्देन्दुवर्णाभ विस्फुरद्भोगमण्डल ॥५७
सर्वनागस्य शूरस्य कृतस्वस्तिकलाञ्छन । नागेन्द्र तक्षक श्रीमन्निहागच्छ नमोऽस्तु ते ॥५८
नवीनजलदश्याम श्रीमन्कमललोचन । विषदर्पबलोन्मत्त ग्रीवायामेकशेखर ॥५९
शङ्खपाल इति ख्यात जलाधारप्रतीक्षक । अध्यक्षे नागलोकानामिहागच्छ नमोऽस्तु ते ॥६०
अतिपीत सुवर्णाभ चन्द्रार्धाङ्कितमस्तक । दीप्तभोगकृताटोप शुभलक्षणलक्षित ॥६१

---

धान्य प्रदान करना बताया गया है । कूप-याग (कूएँ की प्रतिष्ठा) में विशेषकर दरवाजे पर दिक्पालों तथा पश्चिम की ओर स्थित ब्रह्मा और नागराज एवं देवताओं की अर्चा पृथक्-पृथक् मन्त्र विधानों द्वारा

कुलीर नागराजेन्द्र सर्वसत्त्वहिते रत । तिष्ठेह यज्ञसिद्ध्यर्थं कामरूप नमोऽस्तु ते ॥६२
यः सुवर्णेन वर्णेन पद्मपत्रायतेक्षणः । पञ्च बिन्दुकृताभोगो ग्रीवायामेकशेखरः ॥
तस्मै ते पद्मनागेन्द्र तीव्ररूप नमोऽस्तु ते ॥६३
नागिन्यो नागकन्याश्च तथा नागकुमारकाः । सर्वे ते प्रीतमनसः पूजां गृह्णन्तु मे सदा ॥६४
स्वगृह्योक्तेन विधिना कृत्वाग्निस्थापनं बुधः । आज्यं संस्कृत्य जुहुयाद्दिगीशानां यथाक्रमम् ॥६५
आदित्यादिग्रहांश्चैव ब्रह्माणं कृष्णमेव च । मधुपिष्टेन च शिवं वरुणं जुहुयात्ततः ॥६६
प्रादेशमात्रं सम्प्रोक्ष्य यूपं चास्य प्रमाणकम् । चतुरस्रं शूलयुक्तं गणानानीय पूजयेत् ॥६७
कूपे निक्षिप्य तान्नागान्पञ्चरत्नं क्षिपेत्ततः । सुत्रामाणेति मन्त्रेण त्रिधा संवेष्ट्य सूत्रकैः ॥६८
रञ्जितैः कदलीवृक्षं वरुणाय समुत्सृजेत् । त्रातारमिति मन्त्रेण वस्त्रमाल्येन भूषयेत् ॥
कर्णवेधं ततः कृत्वा उत्सृजेद्वाक्यमुच्चरन् ॥६९
(ॐ अद्येत्यादि सर्वभूतेभ्यः फलपुष्पपत्रच्छायावृतमुख्यनानातरुविरचितमारामं वनस्पतिदैवतं सुपूजितं वेदव्यासाद्युक्तफलावाप्तये अमुकऋषिसगोत्रः अमुकदेव शर्माहमुत्सृजे ॥)
महोत्सवं ततः कुर्यात्कृत्वा बद्धाञ्जलिः पठेत् । वृक्षाग्रात्पतितस्यापि आरोहात्पतितस्य वा ॥७०
मरणे चास्थि भङ्गे वा कर्ता पापैर्न लिप्यते । वज्राघातादिदोषेण म्रियन्ते तरवो यदा ॥७१
तद्दोषशमनार्थाय तस्याप्येतत्प्रतिष्ठितम् । मध्ये यूपं समारोप्य चतुष्कोणेऽपि यत्नतः ॥७२

---

सम्पूर्ण प्राणियों के उपकारक नाग राजेन्द्र कुलीर ! काम (स्वेच्छा) रूपधारी, तुम्हें नमस्कार है, इस यज्ञ की सिद्धि के लिए इस स्थल को सुशोभित कीजिये । जो सुवर्ण के समान वर्ण से विभूषित, कमल पत्र की भाँति विशाल लोचन, पाँच बिन्दुओं से अंकित फण, ग्रीवा रूपी एक शिखर वाले तथा तीक्ष्ण स्वरूप वाले हैं उस पद्मनागेन्द्र को नमस्कार है । नागिनी, नाग कन्यायें और नाग कुमार लोग प्रसन्न मन होकर सदैव

**मधुलाजाक्षतं दद्यादञ्जनं माल्यमेव च । निशासूत्रेण संवेष्ट्य कदलीविटपं न्यसेत् ॥७३**
**वेष्टयेत्क्षीरधारां च पातयेद्घृतधारया । तोयान्वितं गुच्छयुक्तं वेष्टयेत्स्वगृहं व्रजेत् ॥७४**

**इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे गोप्रचारवैशिष्ट्यवर्णनं नाम द्वितीयोऽध्यायः ।२**

# अथ तृतीयोऽध्यायः

## छुद्रारामप्रतिष्ठावर्णनम्

### सूत उवाच

**क्षुद्रारामप्रतिष्ठां च वक्ष्ये वै द्विजसत्तमाः । अमण्डले शुभे स्थाने द्विहस्तेऽप्यथ स्थण्डिले ॥१**
**स्थापयेत्कलशं तत्र विष्णुं सोमं समर्चयेत् । आचार्यमात्रं वरयेन्निशासूत्रैः प्रवेष्टयेत् ॥२**
**वृक्षान्माल्यैरलङ्कृत्य भूषयेद्भूषणादिना । दोहदं च ततो दद्यात्स्थापयेच्छतधारया ॥३**
**भोजयेत्पञ्च विप्रान्हि पुरतस्तं विशेषयेत् । कर्णवेधं ततः कृत्वा उत्सृजेद्वाक्यपूर्वकम् ॥४**
**दद्यद्यूपं मध्यदेशे रोपयेत्कदलीं ततः । रम्भाश्च रोपयेद्दिक्षु स्थालीपाकविधानतः ॥५**
**अष्टावष्टौ च जुहुयादन्येषां च घृतेन तु । एकैकामाहुतिं दद्यात्स्विष्टकृत्तदनन्तरम् ॥६**
**दक्षिणां च ततो दद्यात्पूर्णां दत्त्वाहुतिं व्रजेत् ॥७**
**एकादिवृक्षं वृक्षाणां विधिं वक्ष्ये द्विजोत्तमाः । समुत्सृज्य ततो यूपं कर्मणा सह धर्मवित् ॥८**

---

लावा, अक्षत, अञ्जन, माला से विभूषित करते हुए हरदी रंग से रंगे हुए सूत्रों से सुशोभित केले का वृक्ष लगाना चाहिए, पुनः क्षीर धारा घी, धारा समेत जल की धारा से घेर कर गुच्छे से अलंकृत करके अपने

वृक्षमूले यजेद्धर्मं पृथिवीं च विशं तथा । दिगीशांश्च तथा यक्षानाचार्यं तोषयेत्ततः ॥९
धेनुं च दक्षिणां दद्याद्दोहदं वृक्षपूजनम् । कृत्वा सम्यग्विधानेन सवित्रेऽर्घ्यं निवेदयेत् ॥१०
इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे छुद्रारामप्रतिष्ठावर्णनं नाम तृतीयोऽध्यायः ।३

# अथ चतुर्थोऽध्यायः

## छुद्रारामप्रतिष्ठावर्णनम्

### सूत उवाच

अथाश्वत्थप्रतिष्ठायां मूले बाहुप्रमाणके । स्थण्डिलं कारयेत्तत्र चन्दनेनोक्षितं तथा ॥१
पद्मं प्रकल्पयेत्तत्र सामान्यार्घ्यं विधाय च । पूर्वेद्यू रात्रिसमये तद्विष्णोरिति वै ऋचा ॥२
स्थापयेद्वारिणा पूर्णं कया नेति च गन्धकम् । गन्धद्वारेति तैलेन श्रीश्चतेति च चन्दनम् ॥३
दद्याद्दूर्वाक्षतं कल्पे ब्राह्मणत्रयभोजनम् । कारयेत्सितसूत्रैश्च वेष्टयेच्चन्दनोक्षितैः ॥४
कुम्भे विनायकं पूज्य ब्राह्मणं च परे घटम् । स्वदिक्षु दिक्पतींश्चैव वृक्षमूले नवग्रहान् ॥५
मण्डले शिवमभ्यर्च्य पीठपूजापुरःसरम् । अथ ध्यानं प्रवक्ष्यामि श्वेतं वृषभमेव च ॥६
द्विभुजं शूलहस्तं च सर्वाभरणसंयुतम् । आरोपयेत्स्वसामर्थ्याद् भूतशुद्धिं समाचरेत् ॥७

---

विधान बता रहा हूँ। उस धर्म वेत्ता को चाहिए कि विधान पूर्वक यूप स्थापन पूजन करके वृक्ष के मूल भाग में धर्म, पृथिवी, विश, दिक्पाल, यक्षगण, और आचार्य को सन्तुष्ट करना चाहिए। दक्षिणा रूप में योगदान करके भली भाँति विधान पूर्वक दोहद वृक्ष के पूजनानन्तर सूर्य के लिए अर्घ्य प्रदान करना चाहिए ।५-१०

श्री भविष्यमहापुराण में मध्यम पर्व के तृतीय भाग में लघु उद्यान प्रतिष्ठा वर्णन

ततोर्घ्यपात्रं कृत्वा तु पीठपूजां समाचरेत् । गणेशं गुरुपादं च जयं भद्रं समाहितः ।।८
मध्ये आधारशक्तिं च कूर्मानन्तौ सपद्मकौ । चन्द्रसूर्याग्निकादीनां मण्डलानि क्रमाद्यजेत् ।।९
पुनः पात्रान्तरस्थं च गृहीत्वा कुसुमं बुधः । पाणिकच्छपिकां कृत्वा ध्यायेद्वै वरुणं तथा ।।१०
पूर्ववच्च विधानेन दद्यात्पात्रादिकं त्रयम् । मधुपर्कं चासनं च पृच्छेच्च स्वागतं पुनः ।।११
मुद्रां प्रदर्श्य विधिवदङ्गपूजां समाचरेत् । पूर्वादिपत्रे इन्द्रादीन्ब्रह्माणं मध्यतो यजेत् ।।१२
अनन्तं पुरतश्चैव तेषामस्त्राणि तद्बहिः । मध्ये तोयाधिपं रुद्रं शान्तं चैव प्रशान्तकम् ।।१३
भूस्तत्त्वं च भुवस्तत्त्वं स्वस्तत्त्वादि च तत्त्वकम् । कामं धर्ममधर्मं च दिक्षु नारायणं शिवम् ।।१४
नैर्ऋते च यजेद्दुर्गां पार्श्वयोश्च शतक्रतुम् । विनायकं च विष्णुं च गङ्गां पृथिवि षष्टिकम् ।।१५
षोडशेनोपचारेण पूजयेच्च विशेषतः । मण्डलस्योत्तरे भागे नागरूपमनन्तकम् ।।१६
पञ्चकृष्णालकैः कुर्याद्बृहत्पर्वप्रमाणकम् । आरोपयेच्चाक्षताद्यैः श्वेतचन्दनपुष्पकैः ।।१७
पूजयेत्परया भक्त्या अग्निकार्यमथाचरेत् । वरुणं जुहुयात्पूर्वं मधुना पायसेन वा ।।१८
तिलाक्षतैर्वा आज्यैर्वा त्रिमधक्तैरथापि वा । अष्टोत्तरशतं कुर्याद्दिगीशानां घृतेन तु ।।१९
एकैकामाहुतिं दद्यात्पुष्पैस्तिलघृतेन च । नारायणं शिवं दुर्गां गणेशं च ग्रहान्निशि ।।२०
अष्टावष्टौ च जुहुयाद्धृतैरेकाहुतिर्भवेत् । ब्रह्मयुध्वानमितिमन्त्रेण ब्रह्माणं पायसेन तु ।।२१
एकाहुतिं ततो दद्यादापोहिष्ठेति वा त्रिभिः । ततो वरुणमुद्दिश्य दद्यादाज्याहुतित्रयम् ।।२२

---

पश्चात् अर्घ्यपात्र सुसज्जित करके पीठासन की पूजा करके गणेश गुरुपाद, जय, भद्र, मध्य में आधार शक्ति कमल समेत कच्छप, अनन्त, तथा चन्द्र, सूर्य एवं अग्नि की अर्चा पूर्वक मण्डलस्थ सभी देवों की

इमं वरुण इति वा तद्वरोमा ऋचा पुनः । वरुणस्योत्तम्भनमसीति येनापावक एव च ॥२३
वातस्ययमिति पुनः पञ्चवर्णं यथाक्रमात् । ततो वरुणमुद्दिश्य घृतेन च गुडैः सह ॥२४
ततः स्विष्टकृते दद्याद्बलिं दद्यादनुक्रमात् । मध्वाज्यपायसं दद्याद्वरुणाय विशेषतः ॥२५
यवक्षीरं दिगीशेभ्यो ह्यन्येभ्यः पायसेन तु । नागाय पिष्टकं दद्याल्लाजाहोमाष्टकं पुनः ॥२६
अनन्तस्योत्तरे तीरे पद्मपत्रं परिस्तरेत् । अष्टाष्टापदमानेन वरुणं राजतेन तु ॥२७
कुर्यात्पूर्वद्वयेनापि बाणरत्तिसुवर्णकैः । कुर्यात्पुष्करिणीं तत्र पूर्वार्धे चतुरस्रके ॥२८
वरुणं विन्यसेत्तत्र तथा पुष्करिणीमपि । विधिवद्वाक्यपूर्वेण उत्सृजेच्च जलेशयम् ॥२९
ॐ अद्येत्यादि विष्णुरूपाय वरुणाय श्रुतिस्मृत्याद्युक्तवेदव्यासप्रणीताग्निष्टोमफलप्राप्तये पुष्करिणीप्रतिष्ठाकर्मणि इमां पुष्करिणीं सुवर्णराजतां स्वगृह्योदितां सालंकारां सुपूजितामपुक-गोत्रः अमुकदेवशर्मा तुभ्यमहं सम्प्रददे । इत्युत्सर्गवाक्यम् । ॐ अद्येत्यादि ब्राह्मणमुख्येभ्यः ममाग्निष्टोमाद्यनेकफलप्राप्तये इमं जलाशयं वरुणदैवतं सुपूजितं चतुर्मुखसहितं चतुःसत्त्वावच्छिन्न-स्नानपानाद्युपभोगाय अमुकसगोत्रः अमुकदेवशर्माहमुत्सृजे ॥) ततो नौकां समादाय मध्यात्किञ्चित्तथोत्तरे।
जलाशयस्यमध्यं तु ऋत्विग्घोमं चरेत्ततः ॥३०
पूर्वावस्थायिनीं यष्टिं समारोप्य विधानतः । ततो वरुण सूक्तेन वरुणं राजतोद्भवम् ॥
पुष्करिण्या समं तेन नागयष्ट्यन्तरे क्षिपेत् ॥३१

---

'वरुणस्योत्तम्भनमसीति' 'येनापावक इति' एवं 'वातस्ययमिति' इन पाँचों मंत्रों द्वारा क्रमशः आहुति प्रदान के उपरान्त घी, गुड़ की आहुति वरुण के लिए देकर स्विष्टकृत करते हुए क्रम से उन्हें बलि प्रदान

तत्रैवानन्तनागं च मन्त्रमेतदुदीरयेत् । पुण्डरीकदलाभास शुभरक्तान्तलोचन ॥
फणासहस्रसंयुक्त सुप्रतिष्ठ नमोऽस्तु ते ॥३२
दक्षिणां च ततो दद्यात्ततः पूर्णां विधाय च । मोचयेन्मकरान्ग्राहान्मीनकूर्माञ्जलेचरान् ॥३३
पद्मोत्पलं च शैवालं मन्त्रमेव प्रयत्नतः । पुष्करिण्यां च त्रिः कुर्यात्खातं सर्वप्रदक्षिणाम् ॥३४
आदित्याध्यायकं जप्त्वा क्षिपेल्लाजकपर्दकान् । पातयेत्क्षीधारां च सहस्रेण शतेन च ॥३५
सूत्रेण वेष्टयेत्प्राज्ञो रक्तेन च चतुष्क्रमात् । पथि सन्तोषयेद्दीनान्सन्तोष्य च गृहं व्रजेत् ॥३६
इति श्रीभविष्ये महापुराणे मध्यमपर्वणि छुद्रारामप्रतिष्ठावर्णनं नाम तृतीयभागे चतुर्थोऽध्यायः ।४

# अथ पञ्चमोऽध्यायः

## सरोवरादिप्रतिष्ठाविधानवर्णनम्

### सूत उवाच

नलिन्याश्च तथा वाप्या हृदस्य द्विजसत्तमाः । विधिं वक्ष्ये सहाङ्गेन विधानं शृणुत द्विजाः ॥१
स्वर्णपादेन मानेन पूर्वेद्युरधिवासयेत् । आपोहिष्ठेति मन्त्रेण तथा अब्जैः शतैरपि ॥२
स्वमण्डले शुभे स्थाने विशेत्पूर्वमुखेन तु । गणेशं वरुणं चैव घटे सम्पूजयेच्छिवम् ॥३
वागीशं च तथा विष्णुं सूर्यं कुम्भे समर्चयेत् । पायसेनाहुतिं दद्याद्वरुणाय घृतेन च ॥४

---

के भीतर डाल देना चाहिए ।२३-३१। उसी स्थान पर अनंत नाग के लिए इस भाँति प्रार्थी होना चाहिए—कमल दल की भाँति प्रभा, शुभ रक्त वर्ण के नेत्र, और सहस्र फणों से संयुक्त एवं सुप्रतिष्ठित अनंत नाग तुम्हें नमस्कार है । इसके उपरान्त दक्षिणा और पूर्णाहुति प्रदान कर मकर, ग्राह, मछलियाँ,

एकैकामाहुतिं दद्यादन्येषां च स्रुवेण च । बलिदानं पायसेन उत्सृजेत्तदनन्तरम् ॥५
यूपं निवेशयेत्पश्चाद्दद्याद्धेनुं च दक्षिणाम् । पूर्णं दद्यात्सवित्रेऽर्घ्यं दत्त्वा तु स्वगृहं व्रजेत् ॥६
आरामस्य विधिं वक्ष्ये प्रतिष्ठाविधिविस्तरम् । हीनारामस्य च तथा एकवृक्षस्य च द्विजाः ॥७
अरण्यमध्ये पाश्चात्त्ये उत्तरे वा विशेषतः । मण्डपं वर्तुलं कुर्यादर्घ्यहस्तप्रमाणकम् ॥८
तद्दक्षिणे भवेत्कुण्डं चतुरस्रं समं शुभम् । चतुर्मुखं च कर्तव्यं तोरणाद्यैरलङ्कृतम् ॥९
मन्दरादिकमावाह्य ततः सम्पूजयेत्क्रमात् । विष्वक्सेनं च तत्रैव पूजयेद्गन्धचन्दनैः ॥१०
भृगुं कर्णसमारूढं सर्वभूषणभूषितम् । विष्वक्सेनस्य मन्त्रोयं पूजायां चैव सर्वतः ॥११
द्वारपालं च सम्पूर्णं गौर्यादीन्कलशेषु च । स्वासु दिक्षु दिगीशानां बलिपुष्पाक्षतादिना ॥१२
नैर्ऋत्यवरुणयोर्मध्ये अनन्तं प्रतिपूजयेत् । इन्द्रेशानयोश्च मध्ये ब्रह्माणं च प्रकल्पयेत् ॥१३
वेदिपार्श्वे ततो गत्वा वेदिमावाह्य पूजयेत् । आसनं कल्पयित्वा तु सामान्यार्घ्यं विधाय च ॥१४
ऐशाने कलशे विद्युद्ब्रह्माणं च तथा ग्रहान् । स्वैः स्वैर्मन्त्रैर्गन्धपुष्पैर्नैवेद्यैश्च पृथग्विधैः ॥१५
मण्डलेशं वासुदेवं सासनं च बृहस्पतिम् । पूजयेत्परया भक्त्या पायसान्नं बलिं हरेत् ॥१६
द्विभुजं वासुदेवं च शङ्खं चक्रधरं विभुम् । पद्मासनगतं ध्यायेत्पीतवस्त्रं सुशोभनम् ॥१७
नीलोत्पलदलाभासं हरिचन्दनचर्चितम् । देवर्षिसिद्धसहितं कलत्रद्वय संयुतम् ॥१८
ध्यात्वा आरोपयेदेवं बालादीनथ नायकान् । विमलाद्या नायिकाश्च दिगीशांश्च यथाविधि ॥१९

---

चाहिए। (इन देवों के निमित्त यज्ञ-कुण्ड में) तदनन्तर खीर की आहुति प्रदान करें तथा वरुण देव को (हव्य-स्वरूप) घी अर्पित करें।४। एक-एक आहुति स्रुव द्वारा प्रदान करते हुए पश्चात् उन्हें खीर की बलि प्रदान करनी चाहिए।५। यूप-स्तम्भ प्रवेश करने के अनन्तर धेनु समेत दक्षिणा पूर्णाहुति और सूर्य के लिए अर्घ्य प्रदान करके अथ उपवन का सविस्तार प्रतिष्ठा-विधान जिससे एक वृक्ष का भी

षोडशोच्चैः पृथग्रूपैः प्रतिपुष्पाञ्जलिक्रमात् । परितः पूजयेद्विष्णुं शिवं दुर्गां सरस्वतीम् ॥२०
शुद्धस्फटिकसङ्काशं ध्यायेत्सोमं चतुर्मुखम् । अश्वारूढं दिव्यरूपं पद्माक्षं धृतपुष्पकम् ॥२१
वरदं देवगन्धर्वैः सेवितं मुनिभिः स्तुतम् । श्वेतं वनस्पतिं ध्यायेद्द्विभुजं पीतवाससम् ॥२२
स्वरथस्थं महाबाहुं शङ्खाङ्कुशसखेटकम् । विद्यां च वामतो ध्यायेत्स्वमन्त्रेण च स्थापयेत् ॥२३
दशस्वरान्वितं तोयं स्वभावं तमसान्वितम् । मन्त्रोऽयं देवदेवस्य पूजायां विनियोजयेत् ॥२४
नीलं जयं भृङ्गिणं च परितश्च यथाक्रमात् । ततः कुशकण्डिकां कृत्वा स्थालीपाकं विधानतः ॥२५
अष्टोत्तरशतं चैव सोमाय द्वादशाहुतीः । वानस्पतेस्तथाष्टौ च आज्येऽन्येषां विधीयताम् ॥२६
एकैकामाहुतिं दद्यात्सप्तजिह्वामनन्तरम् । वास्तोष्पतय इति मन्त्रेण स्थालीपाकद्वयं नयेत् ॥२७
वनस्पतिं समुद्दिश्य ततोऽयमीरयेदृचम् । वृक्षादीन्स्थापयेत्पूर्वं गायत्र्या प्रथमं बुधः ॥२८
अब्जैरग्रं कांस्यवस्त्रं रत्नं दिक्षु यथाक्रमम् । व्रीहयश्चेति मन्त्रेण तथा च सरितश्च मे ॥२९
मित्रत्रयश्चेति तथा पूषा च मे ऋचा तथा । संस्थाप्य व्रीहीन्संवाप्य तत्रैव विधिपूर्वकम् ॥३०
क्षिपेद्गङ्गाजलं तोये सर्वौषध्युदकेन च । संस्थाप्य यजमानं च सुरास्त्वा मितिमन्त्रकैः ॥३१
आचार्यमात्मने तत्र संस्थितं द्विजपुङ्गवैः । समाप्य नित्यविधिनाचार्यायाथ च दक्षिणाम् ॥३२

---

विमलादि नायिकाओं और दिगीश्वरों की यथाविधान अर्चा षोडशोपचार द्वारा पुष्पाञ्जलि समेत पृथक्-पृथक् विधान से सुसम्पन्न करनी चाहिए। पश्चात् चारों ओर स्थित, विष्णु, शिव, दुर्गा, सरस्वती एवं चतुर्मुख वाले सोम का ध्यान करना चाहिए, जो शुद्ध स्फटिक के समान, अश्व पर विराजित, दिव्य रूप कमल नेत्र, पुष्प धारण किये, वरदायक, देव-गन्धर्वों द्वारा समेवित और मुनियों से स्तुति समाप्त

धेनुं च लोहपात्रं च दत्त्वा इष्टां च दक्षिणाम् । ब्राह्मणेभ्यो यथाशक्ति दद्यात्पूर्णां गृहं व्रजेत् ।।३३

इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे सरोवरादीनां
प्रतिष्ठाविधानवर्णनं नाम पञ्चमोऽध्यायः ।५

# अथ षष्ठोऽध्यायः

## छुद्रारामप्रतिष्ठावर्णनम्

### सूत उवाच

क्षुद्रारामप्रतिष्ठां च वक्ष्ये च द्विजसत्तम । अमण्डले शुभे स्थाने द्विहस्तमयस्थण्डिले ।।१
स्थापयेत्कलशं तत्र सोमं विष्णुं समर्चयेत् । आचार्यमात्रं वरयेन्निशासूत्रैः प्रवेष्टयेत् ।।२
वृक्षान्माल्यैरलङ्कृत्य भूषयेद्भूषणादिना । दोहदं च ततो दद्यात्स्थापयेच्छितधारया ।।३
भोजयेत्पञ्च विप्रांश्च पुरतोऽन्ते विशेषतः । कर्णवेधं ततः कृत्वा उत्सृजेद्वाक्यपूर्वकम् ।।४
दद्याद्यूपं मध्यदेशे रोपयेत्कदलीं ततः । रम्भां च रोपयेद्दिक्षु स्थालीपाकविधानतः ।।५
अष्टावष्टौ च जुहुयादन्येषां च घृतेन तु । एकैकामाहुतिं दद्यात्स्विष्टकृत्तदनन्तरम् ।।६
दक्षिणां च ततो दद्यात्पूर्णां दद्याद्गृहं व्रजेत् ।।७

इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे छुद्रारामप्रतिष्ठावर्णनं नाम षष्ठोऽध्यायः ।६

---

यथाशक्ति अभीष्ट दक्षिणा प्रदान करके पूर्णाहुति के अनन्तर अपने गृह को प्रस्थान करना चाहिए।१६-३३

श्री भविष्यमहापुराण में मध्यम-पर्व के तीसरे भाग में सरोवरादिप्रतिष्ठा विधान वर्णन
नामक पाँचवा अध्याय समाप्त ।५।

# अथ सप्तमोऽध्यायः

## श्रेष्ठवृक्षप्रतिष्ठाविधानवर्णनम्

### सूत उवाच

एकादिवरवृक्षाणां विधिं वक्ष्ये द्विजोत्तमाः । वृक्षस्य पश्चिमे भागे स्थापयेत्कलशं ततः ॥१
वृक्षं संस्थापयेत्पूर्वं सूत्रेण परिवेष्टयेत् । ब्रह्माणं कलशेभ्यश्च सोमं विष्णुं वनस्पतिम् ॥२
ततस्तिलयवैर्होमानष्टाष्टौ विधिवच्चरेत् । समुत्सृज्य ततो यूपं कदल्या सह धर्मवित् ॥३
वृक्षमूले यजेद्धर्मं पृथिवीं च विशं तथा । दिगीशांश्च तथा यक्षान्नाचार्यं तोषयेत्ततः ॥४
धेनुं च दक्षिणां दद्याद्दोहदं वृक्षपूजनम् । कृत्वा सम्यग्विधानेन सवित्रेऽर्घ्यं निवेदयेत् ॥५

इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे श्रेष्ठवृक्षप्रतिष्ठाविधानवर्णनं नाम सप्तमोऽध्यायः ।७

# अथाष्टमोऽध्यायः

## अश्वप्रतिष्ठाविधानवर्णनम्

### सूत उवाच

अथाश्वत्थप्रतिष्ठायां मूले बाहुप्रमाणकम् । स्थण्डिलं कारयेत्तत्र चन्दनेनाङ्कितं यथा ॥१

---

# अध्याय ७

## श्रेष्ठ वृक्ष प्रतिष्ठाविधान वर्णन

पद्मं प्रकल्पयेत्तत्र सामान्यार्घ्यं विधाय च । पूर्वेद्यू रात्रिसमये तद्विष्णोरिति वै ऋचा ।।२
स्थापयेद्वारिणा पूर्णं कयानेति च गन्धकम् । गन्धद्वारेति तैलेन श्रीश्चतेति च चन्दनम् ।।३
दद्याद्दूर्वाक्षतं कल्ये ब्राह्मणत्रयभोजनम् । कारयेत्सितसूत्रैश्च वेष्टयेच्चन्दनस्य च ।।४
कुम्भे विनायकं पूज्यब्राह्मणं च परे घटे । स्वदिक्षु दिक्पतींश्चापि वृक्षमूले नवग्रहान् ।।५
मण्डले शिवमभ्यर्च्य पीठपूजापुरःसरम् । पूर्वे चण्डं प्रचण्डं च दक्षिणे नन्दिभृङ्गिणौ ।।६
अनन्तं पश्चिमे काममुत्तरे गणनायकम् । कार्तिकेयं मध्यदेश आधारशक्तिपूर्वकम् ।।७
अनन्तं पृथिवीं चैव त्रिवृत्तं च त्रिमण्डलम् । अथ ध्यानं प्रवक्ष्यामि श्वेतं वृषभमेव च ।।८
द्विभुजं शूलहस्तं च सर्वाभरणसंयुतम् । आरोपयेत्स्वतन्त्रेण मूले विष्णुं समर्चयेत् ।।९
शङ्करं च तथा मध्ये अग्रे ब्रह्माणकं यजेत् । बलिं च पिष्टकान्नं च दत्त्वा च श्रपयेच्चरुम् ।।१०
जुहुयाद्रुद्रमुद्दिश्य रुद्रसङ्ख्याहुतिं क्रमात् । अन्येषां च स्रुवेणैव होमं दद्यात्प्रयत्नतः ।।११
रोपयेत्कदलीवृक्षमाचार्यं परितोषयेत् । कृत्वा पूर्णां पञ्चधारां कृत्वा चापि प्रदक्षिणाम् ।।१२
क्षीरधारां च सम्पाद्य अर्घ्यं दत्त्वा गृहं व्रजेत् ।।१३

**इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे अश्वत्थप्रतिष्ठाविधानवर्णनं नामाष्टमोऽध्यायः ।८**

---

अर्घ्य-प्रदान करने के अनन्तर पहले दिन रात्रि के समय 'तद्विष्णोरिति' इस ऋचा के उच्चारण पूर्वक जलपूर्ण उसे स्थापित करके 'कयानेति' मंत्र से गंध, 'गन्धद्वारेति' मंत्र से तैल, 'श्रीश्चेति' मंत्र से चन्दन

# अथ नवमोऽध्यायः

## बटप्रतिष्ठाविधानवर्णनम्

### सूत उवाच

वटस्थानमथो वक्ष्ये तस्य मूले तु दक्षिणे । त्रिहस्तवेदिमुपरि स्थापयेत्कलशत्रयम् ॥१
गणेशं च शिवं विष्णुं पूजयित्वा हुनेच्चरुम् । रक्तसूत्रैस्त्रिगुणितैः स्वर्णमेव पुरःसरम् ॥२
यवक्षीरबलिं दद्यादुत्सृजेद्वाक्यमुच्चरन् । यूपमारोपयेत्पश्चाद्वटमूलैः समर्पयेत् ॥३
यक्षान्नागांश्च गन्धार्वान्सिद्धांश्चैव मरुद्‌गणान् ॥४

इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे बटप्रतिष्ठाविधानवर्णनं नाम नवमोऽध्यायः ।९

# अथ दशमोऽध्यायः

## विल्वप्रतिष्ठाविधानवर्णनम्

### सूत उवाच

वक्ष्ये बिल्वप्रतिष्ठां च पूर्वेद्युरधिवासयेत् । त्र्यम्बकं चेति मन्त्रेण स्थापयेद्‌गन्धवारिणा ॥१
सुनाभेति च मन्त्रेण मे गृह्णामीति चाक्षतम् । कयानेति ततो धूपं वस्त्रं माल्यं निवेदयेत् ॥२

---

# अध्याय ९

यजेद्रुद्रं ततो देवं मध्ये दुर्गां धनेश्वरम् । ततः कल्ये समुत्थाय नित्यं निर्वर्त्य शास्त्रतः ॥३
स्वगृहे सप्त विप्रांश्च भोजयेद्द्विजदम्पती । मूले हस्तद्वयं दत्त्वा वर्तुला वेदिका भवेत् ॥४
तत्र गैरिकयुक्तेन कुसुंभचूर्णके न वा । निशारक्तेन वा कुर्यादष्टपत्रं सुशोभनम् ॥५
निवेष्टनं ततः कुर्याद्वृक्षस्य द्विजसत्तमाः । रक्त सूत्रैर्वेष्टयेच्च पञ्चसप्तनवभिस्तु ॥६
व्रीहींश्च वापयेत्तत्र उत्तराभिमुखस्तथा । शिवं विष्णुं च ब्रह्माणं पूजयेद् भूतिमिच्छता ॥७
शिवं च नायकं कुर्यादादित्यान्पत्रमूलके । शेषं च तरुमूले तु मध्येऽनन्तं शतक्रतुम् ॥८
वनपालं च सोमं च सूर्यं पृथ्वीमनुक्रमात् । होमस्तिलाक्षतैः कार्यो बलिं दद्याद्घृतौदनैः ॥९
यक्षेभ्यो माषभक्तं च वायनानि च द्वादश । ग्रहाणां प्रीतये दद्यात्क्षीरेणावेष्ट्य दक्षिणाम् ॥१०
काञ्चनं कास्य पात्रं च ताम्बूलं ताम्रपात्रकम् । यूपारोपं कर्णवेधं सवित्रेऽर्घ्यं निवेदयेत् ॥११
अथ रात्रिप्रतिष्ठां च वक्ष्ये शास्त्रानुसारतः । यक्षैकवृक्षसंस्कारे न पुनर्जायते भुविः ॥१२
पूर्वेद्युरुपवाहे तु वृक्षमूले घटं न्यसेत् । विष्णुं शिवं गणेशं च पूजयित्वा तु स्थापयेत् ॥१३
कलशान्पञ्च वा सप्त गन्धतैलैरलंकृतान् । दुग्धेन पञ्चगव्येन शङ्खतोयेन यत्नतः ॥१४
सूत्रैः संवेष्टनं कृत्वा वस्त्रमाल्यैरनन्तरम् । काण्डादिति च मन्त्रेण दद्याद्दूर्वा क्षतं ततः ॥१५
विष्णुसूक्तेन च पुनः सिन्दूराञ्जनचन्दनम् । दद्यात्फलं च दीपं च स्वयं तत्र स्वपेत्ततः ॥१६
ततः प्रभाते विमले ब्राह्मणान्सप्त भोजयेत् । पूर्ववत्कलशं कृत्वा शिवं विष्णुं गणाधिपम् ॥१७

---

की अर्चा की सुसम्पन्नता पूर्वक प्रातः ब्रह्म मुहूर्त में शास्त्रानुसार नित्यकर्म की समाप्ति करके अपने घर में सात ब्राह्मण, और द्विजदम्पती को उनके मनोनीत-भोजन कराना चाहिए । पुनः उसके मूलभाग में दो ... अथवा चाँदी युक्त कुसुम चूर्ण और हल्दी के

**सोमं वनस्पतिं चैव एककुम्भे समर्च्चयेत् । हुनेत्पञ्चाहुतीस्तत्र यूपं दद्यात्समुत्सृजेत् ॥१८**
**बलिं च पायसेनैव प्रकुर्यात्कर्णवेधनम् । वेष्टयेत्क्षीरतोयेन धान्यं धेनुं च दक्षिणाम् ॥१९**
**दद्यादर्घ्यं हुनेत्पूर्णं भोजयेद्द्विजदम्पती ॥२०**

**इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे विल्वप्रतिष्ठाविधानवर्णनं नाम दशमोऽध्यायः ।१०**

# अथैकादशोऽध्यायः

## सद्वृक्षप्रतिष्ठाविधानवर्णनम्

### सूत उवाच

**शतहस्तमितां मुष्टिं नानातरुविभूषिताम् । पूगाम्रादिफलैर्युक्तं वास्तुं कृत्वा यजेत्तु यः ॥१**
**षष्टिवर्षसहस्राणि स्वर्गलोके वसेच्चिरम् । तद्विधानं प्रवक्ष्यामि यथाशास्त्रानुसारतः ॥२**
**नित्यं निर्वर्त्य विधिवत्पञ्च विप्रान्समर्चयेत् । भोजयेत्पूजयेद्विष्णुं प्रजापतिसमन्वितम् ॥३**
**अग्निकार्यं ततः कृत्वा दद्याद्विप्राय दक्षिणाम् ॥४**

**इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे सद्वृक्षप्रतिष्ठाविधानवर्णनं नामैकादशोऽध्यायः ।११**

---

भाँति कलशों के अर्चन और शिव, विष्णु, गणाधिप, सोम एवं वनस्पति देव की अर्चा एक कलश पर सुसम्पन्न करके पाँच आहुति प्रदान करते हुए यूप-स्थापन और उत्सर्जन कर्म की समाप्ति पूर्वक खीर की

# अथ द्वादशोऽध्यायः

## मण्डपप्रतिष्ठाविधानवर्णनम्

### सूत उवाच

प्रतिष्ठां मण्डपस्यैव शैलदारुमयस्य च । तृणकाष्ठस्य च विभो तृणवत्तस्य च द्विजाः ॥१
अधिवासस्य पूर्वेद्युः शुभे लग्ने घटं न्यसेत् । सूर्यं सोमं तथा विष्णुं कलशे तु समर्चयेत् ॥२
प्रोक्षयेत्कुशतोयेन आपोहिष्ठेति वै ऋचाः । आप्यायस्वेति गन्धेन गन्धद्वारेति गन्धकम् ॥३
आकृष्णेनेति तैलेन श्रीश्च ते इति चन्दनम् । सिन्दूरालक्तकं दद्यादञ्जनं पूर्वया सह ॥४
ततः प्रभाते विमले श्राद्धं वृद्ध्यात्मकं चरेत् । दिक्पालांश्चैव विन्यस्य मण्डपे शुभलक्षणे ॥५
मध्ये वेद्यन्तरे चैव राजभिर्मण्डलं लिखेत् । सूर्यमावाहयेत्तत्र सोमं विष्णुं च पार्श्वयोः ॥६
गणेशं च ग्रहांश्चैव दिक्पालांश्च घटेऽर्चयेत् । पायसं जुहुयादग्नावष्टोत्तरशतं तथा ॥७
आदित्यस्य तथा विष्णोः सोमस्य द्वादशाहुतीः । बलिं च पायसं दद्यात्तैलं क्षीरमथापि वा ॥८
तत उत्सृज्य विधिवद्वाक्यमेतदुदीरयेत् । । जानुभ्यामवनिं गत्वा शनैरोष्ठं न चालयेत् ॥९
वास्तोष्पतिं च तत्रैव पूजयेद्गन्धचन्दनैः । अर्घ्यं दद्याच्च विधिवद्भूतेनैवाहुतिं हुनेत् ॥१०

---

(ॐ अद्येत्यादि ब्राह्मणादिसर्वसत्त्वेभ्यो विष्णुप्रीणनार्थमिमं मण्डपं सुपूजितं सूर्यदैवतं शैलेयेष्टकादिभिः सर्वसत्त्वेभ्यो रचितं श्रुतिस्मृत्युक्तफलप्राप्तिकामनया अमुकऋषिसगोत्रः श्यमुकदेवशर्माहमुत्सृजे ।।)

ततः श्वेतघटं दद्यान्मण्डपोपरि सत्तमाः । त्रिगुणेन निशाक्तैर्वा वेष्टयेद्वारिधारया ।।११

दक्षिणां विधिवद्द्यात्सूर्यायार्घ्यं निवेदयेत् । तृणवेश्मनि वै सूर्यं वासुदेवसमन्वितम् ।।१२

घटे गणेशं वरदं वरं कृत्वा समुत्सृजेत् । ऐशान्यां दापयेद्यूपं ध्वजान्दिक्षु प्रकल्पयेत् ।।१३

मण्डपोपरि कलशं संस्थाप्य मन्त्रमुच्चरेत् । प्रपायां वरुणः पूज्यो विश्वकर्मा प्रयत्नतः ।।१४

पृथिवीं च गणेशं च पूजयित्वा हुनेद्घृतम् । सर्ववर्ज्यमिदं वाक्यं ध्वजमात्रं विधीयते ।।१५

इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे मण्डपप्रतिष्ठाविधानवर्णनं नाम द्वादशोऽध्यायः ।१२

# अथ त्रयोदशोऽध्यायः

## महायूपनिर्माणप्रतिष्ठावर्णनम्

### सूत उवाच

चतुर्हस्तं महायूपं हस्तषोडशनिर्मितम् । वक्ष्ये तं च प्रतिष्ठां च रात्रौ त्रैरात्रिकं यजेत् ।।१

वरुणं सितकुम्भे च प्रपाकूपस्य प्रश्रिमे । गायत्र्या स्नापयेत्पूर्वमापोहिष्ठेति वै क्रमात् ।।२

---

अद्येत्यादि' संकल्प की भाँति कहकर ब्राह्मण आदि सभी प्राणियों के लिए विष्णु के प्रसन्नार्थ इस मण्डप

गन्धद्वारेति गन्धं च अंशुना चेति तैलकम् । मनोज्ञा इति कुसुमं धूरसीति च धूपकम् ॥३
कयानेति ददेद्वस्त्रं नैवेद्यं दीपचन्दनम् । आदौ श्राद्धं न कर्तव्यं प्रतिष्ठान्ते विधीयते ॥४
दम्पतीभोजनं कुर्याद्वरयेदेकब्राह्मणम् । मण्डपे चाष्टहस्ते च कलशं तत्र विन्यसेत् ॥५
पूजयेद्वरुणं देवं नारायणसमन्वितम् । शिवं च पृथिवीं चैव स्वैः स्वैर्मन्त्रैर्यथाक्रमात् ॥६
ततः कुशकण्डिकां कृत्वा स्थालीपाकविधानतः । वरुणं च समभ्यर्च्य जुहुयादाहुतीर्दश ॥७
अन्येषां च स्रुवेणैव दद्यादेकाहुतिं क्रमात् । वरुणस्योक्तवरुणं तत्त्वायामि ततः परम् ॥८
वरुणस्योत्तम्भनमसीति च आभ्यां देवांस्तथैव च । येनापावकचक्षसा पञ्चमं समुदाहृतम् ॥९
रात्रस्य यूपमित्यादि परं च दशमस्तकम् । ततः स्विष्टकृतं कृत्वा सप्तजिह्वं चरुं नयेत् ॥१०
इह वेत्यादिकं पञ्च ततः पञ्चाहुतिं हुनेत् । शम्भवे च पृथिव्यै च महाराजाय च क्रमात् ॥११
चरुपाकेति नैवेद्यं बलिं चैवागुरूदनम् । शङ्कराय च रुद्राय शर्वाय पशुपतये इति च ॥
उग्राय असनायेति भवाय तदनन्तरम् ॥१२
महादेवाय च पुनरीशानायेति च क्रमात् । चरुपाकेति नैवेद्यं बलिं चैवागुरूदनम् ॥१३
वाक्यपूर्वं सृजेत्तोयं तत्र वाक्करणं शृणु ॥१४
(ॐ अद्येत्यादि ब्राह्मणादिसर्वसत्त्वेभ्यः अमुकगोत्रस्य मत्पितुरमुकदेवशर्मणः श्रुतिस्मृत्याद्युक्तं कूप-प्रतिष्ठाजन्यफलप्राप्तये इमं सुपूजितं सच्छादितं वरुणदैवतममुकसगोत्रः अमुकदेवशर्माहमुत्सृजे ॥)
दक्षिणां विधिवद्दद्याद्गां च दद्यात्पयस्विनीम् ॥१५

---

गया है। श्वेत कलश में वरुण का स्थापन प्रपा (पियाऊ) या कूप के निर्माण प्रतिष्ठा में करना बताया गया है, उसमें यह भी कहा गया है कि गायत्री, और 'आपोहिष्ठेति' से स्नान, 'गन्धद्वारेति' से गन्ध,

मण्डपे क्षुद्रकूपे च प्रतिष्ठां शृणुत द्विजाः । गणेशं वरुणं कुम्भे विधिवत्पूजयेत्सुधीः ।।१६
वेष्टयेद्रक्तसूत्रैश्च दद्याद्धूपं समुत्सृजेत् । दक्षिणां विधिवद्दद्याद्विप्रान्सम्पूजयेत्ततः ।।१७

इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे महायूपनिर्माणप्रतिष्ठावर्णनं नाम त्रयोदशोऽध्यायः।१३

# अथ चतुर्दशोऽध्यायः

## पुष्पवाटिकाप्रतिष्ठाविधानवर्णनम्

### सूत उवाच

पुष्पारामप्रतिष्ठां तु वक्ष्ये शृण्वन्तु वै द्विजाः । मध्ये वेदिं त्रिहस्तां च कृत्वा संस्थापयेद्धटम् ।।१
अधिवासस्य पूर्वेद्युर्यथावद्विप्रभोजनम् । कृत्वा घटे गणेशं च सूर्यं सोमं हुताशनम् ।।२
नारायणं स्थंडिले च जुहुयान्मधुपायसम् । विधिवद्यूपमारोप्य गोधूमान्सेचयेद्गुरौ ।।३
वेष्टयेद्रक्तसूत्रैश्च प्रदद्याच्चेति दक्षिणाम् । एतद्धाराजलेनैव यवान्नं सगुडं पयः ।।४
ऐशान्यां यूपमारोप्य विधिवद्द्विजसत्तमाः । कर्णवेधं समारोप्य स्नापयेत्कुशवारिणा ।।५
धान्यं यवं च गोधूमं दद्याद्विप्राय दक्षिणाम् । शतधारजलेनैव वेष्टयेत्परितो द्विजाः ।।६

इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे पुष्पवाटिकाप्रतिष्ठाविधानवर्णनं नाम चतुर्दशोऽध्यायः।१४

---

कूप का प्रतिष्ठा-विधान बता रहा हूँ, सुनो ! विद्वान् को चाहिए कि घट स्थापन पूर्वक गणेश वरुण की अर्चा सविधान सुसम्पन्न करके रक्तवर्ण के सूत्रों से आवेष्टित करने के उपरांत धूप का उत्सर्जन, सविधान दक्षिणा प्रदान और ब्राह्मणों की पूजा करनी चाहिए।१६-१७

# अथ पञ्चदशोऽध्यायः

## तुलसीप्रतिष्ठाविधानवर्णनम्

### सूत उवाच

ज्येष्ठाषाढे तुलस्याश्च प्रतिष्ठां विधिवच्चरेत् । यजमानः शुद्धदिने एकादश्यामथापि वा ॥१
ततो रात्रौ घटं स्थाप्य पूजयेत्परमेश्वरम् । नारायणं शिवं सोमं ब्रह्माणं चन्द्रमेव च ॥२
गायत्र्या स्नपनं कुर्यात्तथोक्तैर्मन्त्रकैरपि । कयानेति च गन्धेन अंशुनेति च तैलकम् ॥३
त्वां गन्धर्वेति च पुनः पुष्पं मण्डंशनेति च । मानस्तोकेति कुसुमं श्रीश्चतेति च चन्दनम् ॥४
वैश्वदेवीति च पुनर्मन्त्रेणानेन चन्दनम् । दूर्वामन्त्रेण दूर्वाश्च रूपेणेति च दर्पणम् ॥५
फलमन्त्रेण च फलं समेधेति च अञ्जनम् । सकुशैः पीतसूत्राद्यैर्वेष्टयेत्क्षीरधारया ॥६
शतधाराजलेनैव वेष्टयेत्स्वगृहं व्रजेत् । वस्त्रेणावृत्य विधिवद्बुधः काले घटं न्यसेत् ॥७
सप्तपञ्चत्रिभिर्वाथ तद्विष्णोरिति वै ऋचा । स्नापयेदथ साध्वीभिः कृतमङ्गलपूर्वकम् ॥८
ततः श्राद्धं समाप्यैव मातृपूजापुरःसरम् । आचार्यं वरयेत्पूर्वं गन्धाद्यैः कुसुमैरपि ॥९
आचार्य एव होता स्याद्ब्रह्माणं च सदस्यकम् । मण्डपे दशहस्तेऽपि वर्तुले स्थण्डिलेषु च ॥१०
सहस्रं मण्डलं कुर्यात्तत्र नारायणं यजेत् । ग्रहाँल्लोकेश्वरान्मध्ये आदित्यांश्च मरुद्गणान् ॥११
रुद्रान्वसूंश्च कलशे परितश्च समर्चयेत् । ततः कुशकण्डिकां कृत्वा होमं तिलयवेन तु ॥१२

अष्टोत्तरशतं कुर्यादन्येषां शक्तितो हुनेत् । नाराधणं समुद्दिश्य दद्यादुत्सृज्य सत्तमाः ॥१३
मध्ये यूपं समुद्दिश्य चरुपाकं बलिं ददेत् । कदलीं दिक्षु संन्यस्य ध्वजान्दिक्षु प्ररोपयेत् ॥१४
दक्षिणां काञ्चनं दद्यात्तिलं धान्यं सपुष्पकम् । धेनुं पयस्विनीं दद्याद्वेष्टयेत्क्षीरधारया ॥१५
जयन्त्याः सोमवृक्षस्य तथा सोमवटस्य च । पनसस्य कदम्बस्य निम्बस्य द्विजसत्तमाः ॥१६
पाटलाकनकस्यैव शाल्मलीनिम्बकस्य च । बिम्बाशोकवटस्यैव प्रतिष्ठां नैव कारयेत् ॥१७
भद्रकस्य शमीकोणचण्डातकबकस्य च । खदिरस्यैव कर्तव्यं कर्णवेधं न कारयेत् ॥१८

इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे तुलसीप्रतिष्ठाविधानवर्णनं नाम पञ्चदशोऽध्यायः ।१५

# अथ षोडशोऽध्यायः

## प्रतिष्ठाविशेषनियमवर्णनम्

### सूत उवाच

वृक्षादीनां प्रतिष्ठां च उत्तमेषूत्तमं चरेत् । मध्ये मध्ये कनिष्ठा तु कनिष्ठं परिकीर्तितम् ॥१
वर्तुलं मण्डलं कुर्यात्तत्तु शीर्षे तथान्त्यके । मध्ये वा वेदिकां कुर्यात्तन्मध्ये कुण्डमण्डलम् ॥२
पूर्वेद्यू रात्रिसमये घटं संस्थाप्य पूजयेत् । शेषं सम्पूज्य विधिवत्पृथिवीं च शिवं तथा ॥३
गन्धतोयेन गायत्र्या सेतुं सम्पूज्य मोक्षयेत् । कयानेति च मन्त्रेण आप्यायस्वेति वै ऋचा ॥४
दद्याद्गन्धादिकं श्रीश्च ते लक्ष्मीरिति चन्दनम् । दूर्वामन्त्रेण दूर्वाश्च फलमन्त्रेण वै फलम् ॥५

---

कुश कण्डिका विधान पूर्वक तिल-जवा की एक सौ आठ आहुति, और अन्य के लिए यथा शक्ति की आहुति

शन्नोदेवीति मन्त्रेण दद्यात्कुशपवित्रकम् । सुरासुरेति मन्त्रेण प्रदद्याद्वस्त्रयुग्मकम् ॥६
अञ्जनालक्तकं कुर्यान्मनोन्ना इति संपठन् । कुर्याच्छ्राद्धं परदिने वसुधारापुरः सरम् ॥७
वरयेदथ आचार्यं होतारं नृवरश्चरेत् । पात्रद्वयं विधातव्यं सदस्याचार्यमेव च ॥८
सेतुयागे विधातव्यं तथा धान्याचलेऽपि च । सहस्रहोमे वैकं तु विवाहे ब्रह्मऋत्विजौ ॥९
यजेदेनं कृते मौलियागार्थं यागमण्डपम् । वेदिमावाहयेत्पूर्वं मण्डपं प्रतिपूजयेत् ॥१०
विघ्नग्रहाँल्लोकपालान्सर्वसिद्धिप्रदायकान् । स्थण्डिले सर्वतोभद्रे शेषं विष्णुं प्रदर्शयेत् ॥११
तत्रैव तु वराहाख्यं प्रतीतमृत्विगुत्तमम् । स्थालीपाकेन जुहुयादष्टाविंशतिकत्रयम् ॥१२
आज्येन तु वराहस्य होमपञ्चकमीरितम् । ततस्तिलयवे नैव एकैकामाहुतिं क्रमात् ॥१३
बलिं दद्यात्पृथग्रूपं शेषयेद्विधिपूर्वकम् । पिष्टकान्नं घृतान्नं च विस्तरे वा गुडौदनम् ॥१४
माषभक्तं तु लोकाय पृथिव्यै परमान्नकम् । वाक्यपूर्वं सृजेद्धीरो वाक्यप्रकरणं श्रृणु ॥१५
(ॐ अद्येत्यादि एकविंशतिकुलस्य विशिष्टस्वर्गप्राप्तय इमं सेतुं सङ्क्रमसमेतं विष्णुदैवतं सुरपूजितं विधिवद्वासुदेवस्य प्रीतयेऽहमुत्सृजे ॥)

बद्धाञ्जलिः पठेन्मन्त्रं कुर्याच्च विधिवत्ततः । पिच्छिले पतितानां च उद्गतेनाङ्गभङ्गतः ॥
प्रतिष्ठिते धर्मसेतौ धर्मो मे स्यान्न पातकम् ॥१६
सेतोरस्य प्रबन्धस्य श्रद्धया परया युतः । ये चात्र प्राणिनः सन्ति सर्वेषां प्राणधारकाः ॥१७
वेदागमेन यत्पुण्यं कथितं सेतुबन्धने । तत्पुण्यं तु मया देव पाथेये हि समर्पितम् ॥१८

---

फल, 'शन्नोदेवीति' से कुश और पवित्री, 'सुरासुरेति' से दो वस्त्र, 'मनोन्ना इति' मंत्र से अंजन, अलक्तक (महावर) से सुसज्जित करना बताया गया है। पुनः दूसरे दिन वसुधारा पूर्वक श्राद्ध सम्पन्न करके

यूपं दद्यादिति मन्त्रेण अन्ते चापि तथा ध्वजान् । विधिवद्दक्षिणां दद्यात्कुलानि नव पञ्च वा ।।१९
पूर्णां दत्त्वा सवित्रेऽर्घ्यं दत्त्वा च स्वगृहं व्रजेत् । अनातपे क्षुद्रसेतोः प्रतिष्ठां विधिवच्चरेत् ।।२०
पूर्वं च दधिवासं च प्रभाते विप्रभोजनम् । सेतुमध्यं ततो गत्वा गन्धादीन्विधिवच्चरेत् ।।२१
विष्णुं शिवं हुताशं च एककुण्डे समर्चयेत् । वास्तोस्पतिं यजेत्तत्र होमं तिलयवेन तु ।।२२
कुर्यादिकैकशो विप्रा अष्टाविंशतिसंख्यया । उत्सृज्य दापयेद्धूपं ध्वजवर्ज्यं हि सत्तमाः ।।
ज्ञातिभिः सह भुञ्जीत कृतकृत्योऽभिधीयते ।।२३

इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे प्रतिष्ठाविशेषनियमवर्णनं नाम षोडशोऽध्यायः ।१६

# अथ सप्तदशोऽध्यायः

## गोप्रचारविधिवर्णनम्

### सूत उवाच

तत्र दण्डे च विप्रेन्द्राश्चतुरस्रे समन्ततः । षष्टिहस्तमितां भूमिं तस्य पूर्णां मनोरमाम् ।।१
प्रचारार्थं गवां चैव यो दद्यात्सुसमाहितः । षष्टिवर्षसहस्राणि रुद्रलोके महीयते ।।२
तदर्धं च तदर्धं च तदर्धं वा समुत्सृजेत् । यो दद्यात्केवलां भूमिं कन्यां दासीं तथा वृषम् ।।३
अलङ्कारं विना धेनुं फलस्यार्धं प्रकीर्तितम् । अमण्डपे शुभे स्थाने शर्करादिविवर्जिते ।।४

---

लिए जो पुण्य बताया गया है, हे देव ! उन पुण्यों को मैं पाथेय के लिए आपको सौंप दिया है । पश्चात् मन्त्र पूर्वक यूप-स्थापन विधान ध्वजों की स्थापना, सविधान दक्षिणा चौदह कुलों की पूर्णाहुति सूर्य के लिए अर्घ्य

द्विहस्तवेदिकामध्ये प्रकुर्यात्सेतुमण्डपम् । तत्र सम्पूजयेद्भद्रं ब्रह्माणं च शचीपतिम् ॥५
गणेशं क्षेत्रपालं च शेषं चैव दिगीश्वरान् । पञ्चोपचारैर्विधिवत्पूजयेत्पायसादिना ॥६
स्थालीपाकेन जुहुयादन्ते वै विप्रभोजनम् । अत्र यागे श्राद्धवर्ज्यं पूर्वेद्युरधिवासयेत् ॥७
त्र्यम्बकेनैव मन्त्रेण भूमिं संस्थाप्य पूजयेत् । तद्विष्णोरिति मन्त्रेण गन्धतैलं सचन्दनम् ॥८
प्रदद्यादसुनीतेति पुनस्तु नैव स्थापयेत् ।पञ्चगव्येन च पुनः श्रीश्चतेति च पुष्पकम् ॥९
एवं यूपस्य च तथा अधिगृह्णाति मन्त्रकम् । गन्धद्वारेति गन्धेन अंशुनातेति तैलकम् ॥१०
सुरासुरेति कुसुमं दूर्वामन्त्रेण दूर्विकाम् । प्रभाते पूजयेद्देवान्रुद्रमुद्दिश्य होमयेत् ॥११
स्थालीपाकेन विधिना अन्येषां पूर्ववच्चरेत् । उत्सृज्यारोपयेद्दीपं स्थिरो भवेति वै ऋचा ॥१२
तन्त्रेण निर्मितं कुर्यात्सफलं च त्रिहस्तकम् । हस्तैकं प्रापयेन्मध्ये क्षेत्रे चैव विशेषतः ॥१३
स्थापयेत्तत्र मन्त्रेण पञ्चगव्येन यत्नतः । मधुवातेति मधुना आप्यायस्वेति वै दधि ॥१४
तद्विष्णोरिति मन्त्रेण घटतोयैरनन्तरम् । पृथिवीं च वराहं च कूर्ममाधवशक्तिकान् ॥१५
वास्तोष्पतिं च विष्णुं च यूपे सम्पूजयेत्क्रमात् । दद्यादर्घ्यं च विवरे गर्ते होमं विवर्जयेत् ॥१६
अर्घ्यपाद्ये च दुष्टे च हस्तेनोत्सृज्य सत्तमाः ॥ (ॐ अद्येत्यादि गोब्राह्मणसर्वसत्त्वेभ्यः पर्यटनार्थाय इमां भूमिं सुपूजितां विष्णुदैवतां गोप्रचाररूपिणीं श्रुतिस्मृत्याद्युक्तफलप्राप्तयेऽहमुत्सृजे॥)
शिवलोकस्थिता गावः सर्वदेवैः सुपूजिताः । एवं निवेदयेद्विप्रो गोप्रचारं समाहितः ॥
स मुक्तः सर्वपापेभ्यो विष्णुलोके महीयते ॥१७

---

सेतु मण्डप के निर्माण करके उसमें भद्र, ब्रह्मा, इन्द्र, गणेश, क्षेत्रपाल, शेष, और दिगीश्वरों की पञ्चोपचार

यावन्ति तृणगुल्मानि सन्ति भूमौ शुभानि च । तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥१८

इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे गोप्रचारविधिवर्णनं
नाम सप्तदशोऽध्यायः ।१७

# अथाष्टादशोऽध्यायः

## दिनैकसाध्यप्रतिष्ठाविधानवर्णनम्

### सूत उवाच

कलौ चैकाहसाध्येन प्रतिष्ठामल्पवित्तवान् । सद्योऽधिवासमाज्येन प्रकुर्यात्तान्त्रिकोत्तमः ॥१
उत्तरं तु गते हंसे अतीते चोत्तरायणे । शरत्काले व्यतीते तु वसन्ते यज्ञमारभेत् ॥२
नारायणादिमूर्तीनां द्वात्रिंशद्भेद एव तु । प्रतिष्ठां[1] प्रतिमानां च गदास्यादींश्च[2] सत्तमाः ॥३
नित्यं[3] निर्वर्त्य मतिमान्कुर्यादभ्युदयं ततः । विप्रान्सम्भोजयेद्वाथ ततो यागगृहं व्रजेत् ॥४
गणेशग्रहदिक्पालान्प्रतिकुम्भेषु पूजयेत् । स्थण्डिले पूजयेद्विष्णुं परिवारगणं यजेत् ॥५
स्नापयेत्प्रथमं देवं तोयैः पञ्चविधैरपि । पञ्चामृतैः पञ्चगव्यैः पञ्चमृत्पिण्डकैरपि ॥६
तिलतैलैश्च स्नेहैश्च कषायैरपि सत्तमाः । पञ्चपुष्पोदकैर्वाथ त्रिपदैरपि सत्तमाः ॥७

---

दिन शुभ तृण-युग्मों की स्थिति सुरक्षित रहती है, उतने सहस्र वर्ष स्वर्ग लोक में वह सम्मान प्राप्त करता रहता है ।१-१८

श्री भविष्यमहापुराण में मध्यम-पर्व के तीसरे भाग में गोप्रचारविधि वर्णन
नामक सत्रहवाँ अध्याय समाप्त।१७।

तुलसीकुसुमापुष्पपत्राण्याहुस्त्रिपत्रकम् । पञ्चकाम्रशमीपद्मकरवीरं च पञ्चकम् ॥८
मृत्तिका करिदन्तस्य तथाश्वखुरमृत्तिका । गोमूत्रं गोमयं क्षीरं दधि सर्पिस्तु पञ्चमम् ॥९
कुर्यात्प्राणप्रतिष्ठां च होमं कुर्याद्यथाविधि । दक्षिणां विधिवद्दद्यात्पूर्णां तु तदनन्तरम् ॥१०

इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे दिनैकसाध्यप्रतिष्ठाविधानवर्णनं नामऽष्टादशोऽध्यायः।१८

# अथैकोनविंशोऽध्यायः

## देवादिप्रतिष्ठावर्णनम्

### सूत उवाच

अतः परं तु विप्रेन्द्राः काल्यादीनां तथैव च । अधिवास्य च पूर्वेद्युः श्राद्धमभ्युदयात्मकम् ॥१
प्रथमे जलजैः स्नानं पञ्चगव्यैरनन्तरम् । पूर्ववच्च विधानेन कुम्भे दुर्गां समर्चयेत् ॥२
पञ्चामृतैः पञ्चगव्यैः करीषशतधारया । श्रीबिल्वे पूजयेद्देवीं दद्यात्प्राणमनन्तरम् ॥३
बिल्वपत्रैः फलैर्वापि दद्याच्चापि शताहुतीः । एकैकशस्तु सर्वेषां दद्यात्काञ्चनदक्षिणाम् ॥४
प्रतिमां कालिकायाश्च तारायाश्च पृथक्पृथक् । ग्राह्यं विनार्चयेद्विप्राः पञ्चपञ्चशतैरपि ॥५
भोजयेत्स्नापयेद्देवीं गन्धतोयैर्दिनत्रयम् । ताम्रकुम्भेऽर्चयेद्देवीं त्रिदिनं प्रातरेव हि ॥६
समीरणं ततो दद्यात्पेटिकायां निवेशयेत् । ततोऽपि गन्धतोयैश्च स्नापयेत्कन्यकादिभिः ॥७
ततो वै चाष्टमदिने रात्रावपि प्रपूजयेत् । पशुदानं प्रकर्तव्यमग्निकार्यं च पायसैः ॥८

---

पंचक, आम, शमी, कमल, कनेर को पञ्चक, गजदाँत, अश्वखुर की मिट्टी, गो-मूत्र, गोबर, दूध, दहीं एवं

शिवलिङ्गप्रतिष्ठां च वक्ष्ये तन्त्रमतं यथा । त्रिविप्रं भोजयेद्विप्रा अधिवास्यं विशेषतः ॥९
नित्यं समाप्य च पुनः कुर्यादभ्युदयं ततः । आचार्यं वरयेत्प्रातः स्नापयेत्पूर्ववर्त्मना ॥१०
परिवारगणैः सार्द्धमर्चयेत्तदनन्तरम् । दद्यात्समीरणं पश्चादग्निकार्यं समाचरेत् ॥११
तिलहेममयीं गां च दद्याद्गां च विधानतः । न नाम न च गोत्रं च होमकर्मणि सर्वदा ॥१२
पूर्णिमायां विशेषेण नान्येषां च कथञ्चन । होमान्ते वसुधारां च कुम्भे दत्त्वा विधानतः ॥१३
त्रिहस्तचरकायं च हस्तैकं चतुर्हस्तके । शालग्रामशिलायाश्च प्रतिष्ठां विधिवच्चरेत् ॥१४
सद्योधिवासयेद्देवं द्वादश्यां स्नापयेदथ । रत्नतोयैः परिमलैस्त्रिगन्धैः पञ्चपल्लवैः ॥१५
कुम्भे प्रजापतिं स्थाप्य श्वेताब्जं नवनाभके । नवदुर्गोक्तमार्गेण पूजयेत्परमेश्वरम् ॥१६
चक्रस्वरूपतो ज्ञेयं प्रदद्याच्च समीरणम् । आनीय ताम्रभाण्डे च त्रिकालं प्रतिपूजयेत् ॥१७
पायसान्नैरुत्पलैर्वा पङ्कजैर्वापि होमयेत् । सकाञ्चनं वस्त्रयुग्मं प्रदद्याद्भूरिदक्षिणम् ॥१८
श्रीसूर्यस्य गणेशस्य विरिञ्चेश्चापि सत्तमाः । वटवृक्षान्तिकं गत्वा स्थापयेद्वरुणं ततः ॥१९
रक्ताब्जे पूजयेत्सूर्यं परिवारसमन्वितम् । अष्टाविंशतिभिर्दत्त्वा दद्यात्प्राणमनन्तरम् ॥२०
एकाहमथवाकाशे गुप्तं कृत्वा दिनत्रयम् । त्र्यहादेव पुनः पूजां पुनर्होमं समाचरेत् ॥२१
पुनश्च भोजयेद्विप्रान्दद्यात्काञ्चनदक्षिणाम् । वाराह्यास्त्रिपुरायाश्च नारिकेलोदकैरपि ॥२२

---

करनी चाहिए।१-८। तंत्र मतानुसार मैं तुम्हें शिवलिङ्ग की प्रतिष्ठा का विधान बता रहा हूँ, इस अनुष्ठान में तीन ब्राह्मणों के भोजन सुसम्पन्न करने के अनन्तर विशेषकर अधिवासन कर्म की समाप्ति और नित्यकर्म करके आभ्युदयिक श्राद्ध एवं आचार्य का वरण करना चाहिए। पुनः प्रातः समय पूर्वोक्त रीति से स्नान कराकर परिवार गणों के साथ उनके अर्चन, वायुदान करते हुए हवन कार्य सम्पन्न करना

स्थापयेद्वा विधानेन सिन्दूराद्यैः समर्चयेत् । दद्यात्समीरणं पश्चात् पुनः पूजां च होमयेत् ॥२३
पशुदानं च कर्तव्यं षण्मासैः पञ्चमोदकैः । कुमारीं भोजयेद्रात्रौ दद्यात्काञ्चनदक्षिणाम् ॥२४
प्रतिमां भुवनेशीं च महामायाम्बिकामपि । कामाक्षीं च ततो देवीमिन्द्राक्षीं चापराजिताम् ॥२५
पूर्वेद्यू रात्रिसमये पिष्टकाष्टौ निवेदयेत् । अष्टौ निर्माणयेत्पश्चाद्बलिं चाष्टौ विधानवित् ॥२६
परिवारगणैः सार्द्धं पूजयेत्प्रयतः सुधीः । समीरणं ततो दद्याच्छिवं सूर्यं यजेत्पुनः ॥२७
पायसान्नैश्च जुहुयात्त्रिदिनं लिपिपूजनम् । कुमारीपूजनं कुर्यादग्निकार्यं दिनत्रयम् ॥२८
पशुदानं च कर्तव्यं विभवे सति सत्तमाः । रात्रौ जागरणं कुर्यान्मठोत्सवपुरःसरम् ॥२९

इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे देवादिप्रतिष्ठावर्णनं नामैकोनविंशोऽध्यायः ।१९

# अथ विंशोऽध्यायः

## ग्रहोपद्रवोत्पातशान्तिवर्णनम्

### सूत उवाच

दुर्निमित्तान्यथो वक्ष्ये शृण्वन्तु मुनिसत्तमाः । यस्य ये ग्रहदोषाः स्युस्तेषां शान्तिं यथाक्रमात् ॥१
दिव्यन्तरिक्षे भौमे चेत्येवं त्रिः परिकीर्तितम् । ग्रहर्क्षाद्यैः कृतं दिव्यमान्तरिक्षं निबोध मे ॥२
उल्काहितो दिशो दाहः परिवेषस्तथैव च । जलाशयानां वै कृत्यं भौमं तदपि कीर्तितम् ॥३

---

नारियल के जल द्वारा भी उनके स्थापन पूर्वक सविधान सिन्दूरादि से उन्हें विभूषित करना चाहिए । पुनः समीरण दान, पूजा और हवन करने के अनन्तर छह मास के पशु की बलि, पाँच प्रकार के जल से

भौमं चाल्पफलं ज्ञेयं दिव्यान्तरिक्षमेव च । सप्ताहमफलं दद्याद्दैवं चापि च तत्क्षणात् ॥४
देवानां हसनं चैव कल्कनं रुधिरस्रवः । अकस्माद्व्यसनं तत्र यत्र निर्घातनिर्दयः ॥
सर्पाद्यारोहणं चैव दैवं तदपि कीर्तितम् ॥५
ततो मेघात्समुत्पन्ना यदि वृष्टिः शिलातले । सप्ताहाभ्यन्तरे जीवमुत्पन्नं निष्फलं भवेत् ॥६
एकराशिस्थिताः पापाः शनिभौमदिवाकराः । पृथ्वी धूमाकुला तत्र रुदन्ति बहवो जनाः ॥७
अभिचारं गते जीवे शनौ च तत्र नागते । तत्र पश्यति राजेन्द्रः को धरां धारयिष्यति ॥८
सूर्यमपश्यनो द्वन्द्वं दिग्दाहश्च तथैव च । दर्शनं धूमकेतोश्च नक्षत्रे धूमदर्शनम् ॥९
भूकम्प एव मासे च एकमासे तथा दिने । राज्ञो जन्मदिने वाथ शक्रचापं दिनान्तरे ॥१०
दर्शनं खरवातस्य ग्रहयुद्धस्य दर्शनम् । मासत्रये तु ग्रहणमुल्कापातप्रपातनम् ॥११
आकाशेऽप्यथ भूमौ च तत्र मण्डूकमेव च । हरिद्रावृष्टिः पाषाणे सिंहबिल्वाकृतिर्यदि ॥
दर्शने राष्ट्रदुर्भिक्षमकरं नृपतिक्षयः ॥१२
चैत्रे कुम्भे नदीवेगदर्शने विप्लवो भवेत् । अर्कस्याद्भुतमेतद्धि स्रुग्युक्तं श्रपयेच्चरुम् ॥१३
आकृष्णेनेति मन्त्रेण अथवार्केण यत्नतः । प्रासादतोरणं तत्र द्वारं प्राकारवेश्म च ॥१४
धान्यसारं गवां सारं कूपेकुम्भप्रदर्शनम् । आदित्यस्याद्भुतं विद्यात्कमलं जुहुयात्ततः ॥१५

---

अन्तरिक्ष तथा भौम (भूमि में होने वाला) भी कहते हैं ।१-३। भौम का अल्प फल एवं दैवी अन्तरिक्ष के अन्तरिक्ष जनित अशुभ सूचक के परिणाम एक सप्ताह के उपरांत और देव का उसी समय दृष्टि गोचर होता है ।४। देवताओं का हँसना, कलह, रुधिर का स्राव, एवं निर्दयता पूर्ण आघात (वज्रादि जैसे गिरने) से वहाँ की जनता को भाँति-भाँति के अनेक दुःखों के अनुभव करने पड़ते हैं । उसी भाँति सर्पादि

सहस्रं जुहुयाद्वाथ ततः शान्तिर्भवेद् ध्रुवम् । विकृताः पक्षिणश्चैव पाण्डुकपोतकास्ततः ॥१६
श्वेतोलूको बृहंश्चैव द्रोणकाकश्च कोकिलः । क्रौञ्चश्च वर्द्धनी चैव निपतन्ति गृहे यदि ॥१७
गृहे तस्य महोत्पातो भविष्यति न संशयः । स्थूलभङ्गप्रग्रहणं प्ररोहणमथापि वा ॥१८
हाराः कटकटायन्ते जातस्य दन्तसम्भवः । हसता देवतानां च गात्रे स्वेदश्च जायते ॥
सर्पमण्डूकप्रसवः कुम्भे वापि क्वचिद्भवेत् ॥१९
निमित्तान्येवमादीनि जायन्ते यस्य वेश्मनि । षड्भिर्मासैश्च म्रियते गृहिणी च शुभा च या ॥२०
अशनिः पतते यत्र गृहे वज्रं च पादपे । शुक्ला वह्निस्फुलिङ्गाश्च तस्य विद्धि महद्भयम् ॥२१
खर्जूर उदरावर्ते निकोचगरलेऽपि च । फलिवृक्षे तिन्दुके च यत्र निर्जायते क्वचित् ॥२२
उद्याने देवगेहे च स्वगृहे चैत्यवृक्षके । कुर्यादादित्यवारे वा अयुतं तिलपायसम् ॥
ततः शान्तिर्भवेदाशु धेनुं दद्याच्च दक्षिणाम् ॥२३
पायसं तिलमुद्गौ च पुष्पं वा तालवृन्तकम् । इक्षुमोदकपिण्याकाञ्जुहुयाद्रविमुद्दिशन् ॥२४
सिंहासनं रथश्छत्रं ध्वजश्चामरभूषिते । अकस्माद्दृश्यते यत्र राज्ञो वान्यत्र कुत्रचित् ॥२५
नदयन्ति च सत्यस्योज्ज्वलनं स्त्रीपुरुषयोः । आगमस्य च दृष्ट्वैव भङ्गः कटकटायनम् ॥२६
उपरिष्टाद्भवेद्यस्य महोत्पातो भवेदयम् । चलत्वं चाधरस्यापि तथा कटकटायनम् ॥२७
रुदितं कोकिलस्यापि उलूकोऽप्यशुभं वदेत् । राजामात्यविनाशाय महीं च तत्सुतोऽपि वा ॥
हस्तिनो मदयुक्ताश्च म्रियन्ते नात्र संशयः ॥२८
ताडीपूगादयो यत्र यमौ स्यातां प्रमादतः । गेही तत्र विनश्येत सदारः पुत्रसंयुतः ॥२९

---

सहस्र आहुति प्रदान करनी चाहिए। गृह के ऊपर (उल्लू) द्रोण कौवा, कोकिल, क्रौंच एवं वर्द्धनी

बद्धपुष्पे यदा पुष्पं फलं वा यदि दृश्यते । अक्षतादर्शनात्तत्र सोमस्याद्भुतदर्शनम् ॥
दधि मधु घृतं चैव जुहुयादयुतं द्विजाः ॥३०
पालाशं सोममुद्दिश्य सोमस्य च भवेद्दिने । इमं देवा इति मन्त्रेण सोमाय श्रपयेच्चरुम् ॥३१
उत्पतन्ति गृहे यस्य यवा माषाश्च पुष्कलाः । दधिक्षीराज्यपाकेषु रुधिरं दृश्यते यदि ॥३२
अकस्माद्गृहदाहस्तु अनग्निज्वलनं यथा । मेघहीना भवेद्विद्युद्वृषस्योद्गमनं तथा ॥३३
व्याधिलीना विनश्यन्ति निखिलाः पशुमानुषाः । एवं सर्वाणि भूतानि भवन्त्यकारके ध्रुवम् ॥३४
राजामात्यविनाशाय गेहे गेही विनश्यति । प्राणनाशाय विप्रायाहुत्या च प्रभवन्ति हि ॥३५
दृष्ट्वा वाभद्रमत्युग्रं जुहुयादयुतं क्रमात् । दधिमधुघृतैर्युक्तं खादिरोदुम्बरेऽपि च ॥३६
अग्निर्मूर्द्धेति मन्त्रेण श्रपितं लोहितं चरुम् । त्रिविप्रान्भोजयेद्दद्याद्दक्षिणां लोहितं ततः ॥
स्वर्णमङ्गारमुद्दिश्य ततः शान्तिः प्रजायते ॥३७
पुष्पं वा पातयेद्यत्र फलं वापि तथैव च । दध्यन्नं च घृतैर्मिश्रं रौप्यं हिरण्यमेव च ॥३८
हस्त्यश्वमहिषा गावो दारापत्यधनानि च । तुष्टेनाङ्गारकेणैव सर्वमेतत्प्रदीयताम् ॥
आङ्गारकेण मन्त्रेण खादिरं चाक्षतैर्युतम् ॥३९
दक्षिणां च यथाशक्ति दद्याद्विप्राय वा पुनः । लोहितं च बलिं दद्यात्ततः सम्पद्यते शुभम् ॥४०
धावन्ति चोर्ध्वपुच्छाश्च गृहे गावः स्वयं यदि । आरोहन्ति गृहं विप्राः सारमेयाश्च सूकराः ॥४१
गृहे यस्य भवन्त्येते तस्य भार्या विनश्यति । सर्वेषां वा भवेन्मृत्युर्वन्ध्या गौर्वा प्रजायते ॥४२

---

उसकी शान्त्यर्थ दही, शहद, घी की दश सहस्र आहुति पलाश की समिधा द्वारा प्रज्वलित अग्नि में सोम के दिन सोम के उद्देश्य से 'इमं देवा इति' इस मंत्र के उच्चारण पूर्वक खीर समेत प्रदान करनी चाहिए और

मिथ्यावादेन गेही च राज्ञा वादैश्च तिष्ठति । अथवा यद्गृहे गावो नर्दयन्ति हसन्ति च ॥४३
धरणीहननं यत्र द्वयोरास्कन्दनं तथा । निमित्तान्येवमादीनि गोऽश्वजातानि सत्तमाः ॥४४
यस्य गेहे भवन्त्येते नाशस्तस्य भवेद् ध्रुवम् । मण्डूकसर्पकूष्माण्डाः प्रसुवन्ति यथा स्त्रियः ॥४५
अकस्माद्यदि चैतानि बुधस्योत्पातलक्षणम् । शान्तिं तत्र प्रवक्ष्यामि यथा सम्पद्यते सुखम् ॥४६
दधिमधुघृताक्तं च अपामार्गं तथा पुनः । अयुतं बुधवारे च जुहुयाच्छ्रद्धया युतः ॥४७
उद्‌बुधस्वेति च मन्त्रेण बुधाय श्रपयेच्चरुम् । सुवर्णं बुधमुद्दिश्य गां च दद्यात्पयस्विनीम् ॥४८
सुवर्णं पुष्पवृष्टिं च सुफलं चाक्षतं तथा । गृहे प्राङ्गणके यस्य निपतन्ति कदाचन ॥४९
अलङ्कारयुतां वापि सर्वाभरणभूषिताम् । गृहमध्ये तु यः पश्येत्क्षीणामन्तर्हितां स्त्रियम् ॥५०
अकस्मान्मालतीपुष्पं जातं स्यात्तस्य वा गृहे । सोमाय न च सन्तुष्टः सर्वमेतत्प्रदृश्यते ॥५१
धनं धान्यं तथा पुत्र ऐश्वर्यं च वरस्त्रियः । सभृत्याश्च महिष्यश्च मरिष्यन्ति न संशयः ॥५२
श्रीश्चतेति च मन्त्रेण अवामार्गं तथा बुधः । सहस्रं बुधवारे च जुहुयाद् घृतसंयुतम् ॥५३
पयस्विनीं तथा गां च वासोयुगसमन्वितम् । द्विजाय श्रद्धया दद्यात्ततः सम्पद्यते शुभम् ॥५४
रक्तस्रावो भवेद्यत्र तत्र ऋत्विक्प्रसूयते । सिंहव्याघ्रगवादीनां धनहानिविपत्करः ॥५५
एको वृषस्त्रयोगावः सप्ताष्ट नव दन्तिनः । संवत्सरेण तस्यैका प्रसूतिर्विहता पुनः ॥५६
पुनःपुनर्व्रतं चाशु अकाले मैथुनं तथा । गावो यत्र प्रसूयन्ते यमौ दोषकराविमौ ॥५७

---

अथवा मिथ्या कलह करने वाले गेही और राजा हो जाते हैं। जिसके गृह में गायें चिल्लाती और हँसती हों, पृथिवी में आघात करती हों, या दो गायों के आक्रमणात्मक युद्ध हों, अथवा सत्तमवृन्द ! इसे अश्व भी करें, तो इस प्रकार के दुर्निमित्त वाले गृह का निश्चित विनाश हो जाता है। स्त्रियों की भाँति मेढ़क,

भञ्जीकृतानि धान्यानि व्रीहयो यवतण्डुलाः। ग्राविमार्जारमण्डूकाः स्थूणाभङ्गे च प्राङ्गणे ।।५८
विकिरन्ति नखैर्भूमिं प्ररोहन्ति ग्रहं तथा। गृहे यस्य प्रजायन्ते तस्य मृत्युर्न संशयः ।।५९
षण्मासाभ्यन्तरे यत्र श्मशानं यास्यति ध्रुवम्। कलहं ज्ञातिवैरं च व्याधिपीडा भविष्यति ।।६०
विप्रलापो मित्रनाश इष्टेष्वनिष्टदर्शनम्। भार्यापुत्रविनाशश्च भवेदेषु विनिश्चितम् ।।६१
क्रियावन्तं यदा कुर्वन्कुर्वीत गृध्रबिल्वके। तदा राज्ञां विभ्रमश्च तथागृहविनाशनम् ।।६२
अमात्यवर्गाश्च पुरे राज्ञां राज्यपराङ्मुखाः। बृहस्पतिं समुद्दिश्य गां च दद्यात्पयस्विनीम् ।।६३
वारिमण्डे च कूपे च वाप्यां च मधुकाञ्जिके। क्षीरं दधिघृतं चैव जातं यदि भविष्यति ।।६४
अकस्मात्तत्र वृक्षश्च फलेन सह संयुतः। गृहमध्ये प्रजायेत ततः सम्पद्यते शुभम् ।।६५
बृहस्पतेस्तु तुष्टस्य सर्वमेतन्निदर्शनम्। गौरं बृहस्पतेश्चैव प्रकुर्यात्प्रायदक्षिणाम् ।।६६
अशुभं हि शुभेनैव शान्तिं होमं च कारयेत्। तत्रैव राक्षसं यत्र घटकं परिशोषणम् ।६७
केसरी शर्करा तैलं राजतं ताण्डवं स्थितम्। माषभक्तं तथा धान्यं सुवर्णं रजतानि च ।।६८
ताम्रं कांस्यं तथा लोहं सीसकं पित्तलं तथा। स्थापितानीव दृश्यन्ते गृहे चैतानि यस्य वै ।।६९
धननाशो भवेत्तस्य स्वर्गभङ्गो ह्यथापि वा। व्याधिपीडे तथा घोरे राजोपद्रवबन्धने ।।
गजाश्वपशुभृत्यानां विनाशो जायते ध्रुवम् ।।७०

---

इसी भाँति गौ के प्रसव भी, दोनों दोष कारक बताये गये हैं। धान्य, ब्रीहि, जवा और चावल के कूट-छाँट कर रखने, उस समय टूटे खम्भे वाले प्राङ्गण में ग्रावि, बिल्ली, और मेंढक अपने नाखूनों से भूमि खोदते हों, और कूद-कूद कर ऊपर घर के चढ़ते हों, तो उस गृहपति की मृत्यु होती है इसमें संदेह नहीं। तथा छः मास के भीतर ही किसी की निश्चित श्मशानयात्रा (निधन), गृह में कलह, बन्धुओं से वैर एवं रोगजनित

यस्यैतानि प्रदृश्यन्ते पर्वतः कनकानि च । सम्पत्तस्य प्रजायेत निश्चला सुखदा सदा ॥७१
दन्तोत्तरेषु दन्ताश्च पङ्क्तिमाक्रम्य संस्थिताः । तेऽपि दोषकराः सर्वे शलाकाकृतिनस्तथा ॥
उपदन्ताश्च सर्वे ते न ते दोषकराः क्वचित् ॥७२
भाण्डे कुम्भे यदा चैव श्रूयते घनगर्जितम् । कञ्चुकानां गृहे चैव प्राकारः श्रूयते यदि ॥७३
मूषिकानां मुखे चैव ज्वलन्ती यस्य पश्यति । गेही तत्रैव नश्येत शुक्रस्याद्‌भुतदर्शनम् ॥७४
शांतिं तत्र प्रवक्ष्यामि यया सम्पद्यते शुभम् । शमीपत्रं निर्मितं च यवैर्युक्तं गृहिण्यपि ॥
दधिमधुघृताक्तं च जुहुयाद्भार्गवे दिने ॥७५
शुक्लवासोयुगं चैव गां च शुक्लां पयस्विनीम् । सुवर्णं श्रद्धया चैव दद्याद्विप्राय दक्षिणाम् ॥७६
देवागारे यदा भूमिर्लोहिता यस्य दृश्यते । पुष्पिता दृश्यते लोके तत्र विद्धि महद्भयम् ॥७७
राजा वा राजपुत्रो वा राज्यं वापि विनश्यति । मन्त्रिणो मन्त्रिपुत्राश्च म्रियन्ते नात्र संशयः ॥७८
यत्र वा दृश्यते लोके गृहे यस्य सुपूजिताः । पुष्पिताश्च गृहस्तम्भाः शरीरं च घटस्तथा ॥७९
हस्त्यश्वमहिषाश्चैव अजागावस्तथैव च । नित्यं स्वामिवधार्थाय पुष्पितां प्रवहन्ति च ॥८०
गृहे हंसो गृहे सम्यङ्मण्डूका जलचारिणः । द्वारे प्रविश्य सर्पश्च प्रतिमायाः प्रकल्पनम् ॥८१
अकस्माद्घटशब्दोऽपि यत्र कुत्रापि जायते । स्रवन्ति प्रमदा यत्र भिन्नास्ते स्युर्नवांगिकाः ॥८२
गृही तत्र विनश्येत सपुत्रपशुबान्धवः । धनुःखड्गधरा रात्रौ मध्याह्ने चान्द्रके तथा ॥८३
उदितो दृश्यते व्योम्नि ज्वलितः पावकस्तथा । मनुष्याङ्गनानां मरणं तथा स्याद्राष्ट्रविप्लवः ॥८४

---

जिसे पर्वत और सुवर्ण के दर्शन होते हैं, उसे निश्चल एवं सदैव सुख-दायक सम्पत्ति की प्राप्ति होती है।

रससिद्धानि वस्तूनि सुराद्याश्चापि वा पुनः । हस्तिनो मदयुक्ताश्च अश्वा धीरितर्हिसकाः ॥
विनश्यन्ति सदा चैते शनैरद्भुतदर्शने ॥८५
नगरे वा तथा ग्रामे जायन्ते तस्य वैरिणः । दिवा वा यदि वा रात्रौ शनेरद्भुतदर्शनम् ॥८६
मृगव्याघ्रादिरक्षांसि तथा गोमहिषा अपि । उत्पतन्ति यदा चैते शनेरद्भुतमादिशेत् ॥८७
निधिमन्त्रं प्रवक्ष्यामि येन सम्पद्यते शुभम् । जुहुयादयुतं सम्यक्सस्यांश्च समिधं द्विजाः ॥८८
शन्नो देवीति मन्त्रेण शुभार्थं शनिवासरे । चरुं च श्रपयेत्तत्र समुद्दिश्य शनैश्चरम् ॥८९
गां च नीलां ततो दद्याज्जीवद्वत्सां पयस्विनीम् । वासोयुगं च विप्राय सुवर्णं रजतं तथा ॥९०
दत्त्वा तु श्रद्धया सम्यग्दक्षिणां शिरसि स्थिताम् । विधिं होमावसाने तु ततः सम्पद्यते शुभम् ॥९१
यदा द्वारे गोधिका च शङ्खिनी प्रविशेद्गृहम् । तदाऽशुभं विजानीयाद्राजपीडा धनक्षयः ॥
अयुतं जुहुयात्सम्यक्ततः सम्पद्यते शुभम् ॥९२
विना गर्जितमेघेन शिलावृष्टिः प्रजायते । रक्तमिश्रा हि पांडुश्च पतन्ती यत्र दृश्यते ॥९३
तत्र सन्दृश्यते चाभ्रं वृक्षा वातविवर्जिताः । शक्रध्वजस्तथा चापं पतनं सुमनस्य च ॥९४
दिवा शिवा पुरा रौति उलूको वा निशाचरः । निशि निपत्य काकुत्स्थे प्रदेशे रौति वा वृषः ॥९५
अधर्मप्रबला देशा राजा धर्मपराङ्मुखः । अन्योन्यं च जिघांसन्ति गोब्राह्मणमथापि वा ॥९६
गृहे गृही विनश्येच्च सपुत्रपशुबान्धवः । उत्सानं द्वारदेशेऽस्य मरणं राष्ट्रविभ्रमः ॥९७
राज्यनाशो भवेद्राज्ञो मरणं वाहनस्य च । विपरीतानि देशानि क्रमतः सम्भवन्ति हि ॥९८

---

होता है ।८१-८४। रस द्वारा सिद्ध की गयी वस्तुओं, मद्य आदि, मतवाले हाथी, घी काटने वाले, अश्व के विनाश शनि-जनित उत्पात में सदैव हुआ करते हैं । दिन अथवा रात्रि में शनि द्वारा उत्पात होता है, तो

राहुणा ग्रस्तसूर्योऽपि निशि चाथ यदा दिवा। तारकागणवच्चैव राज्ञां निधनकारकः ॥९९
सहामात्या विनश्यन्ति स्वर्गे ये च सुदुर्जयाः। परचक्रेण पात्यन्ते राजानो नात्र संशयः ॥१००
छायाध्वजश्च गगने दृश्यते चेत्कदाचन। दर्शनादेव राज्ञस्तु विनाशः सहराष्ट्रकैः ॥१०१
ज्वलितो दृश्यते यत्र पावकश्च सकृज्जले। वज्रे शिरसि गात्रे वा जीवितं तस्य दुर्लभम् ॥१०२
द्वारोपान्ते तथा स्तम्भे आग्निर्वा धूम एव वा। पुरुषस्य तु तत्रैव मरणं जायते ध्रुवम् ॥१०३
गगनेऽशनिघातश्च शक्तिहस्तेन वा पुनः। अब्दस्याभ्यन्तरे तस्य मरणं नात्र संशयः ॥१०४
शिखावलयमध्ये तु सधूमः पावकोद्गमः। दृश्यते नगरे मध्ये तत्रैवाद्भुतदर्शनम् ॥१०५
शवस्य नीयमानस्य उत्थानं वा प्रमादतः। स्थापितस्य च लिङ्गस्य अन्यत्र गमनं तथा ॥१०६
निर्घातश्चापि भूकम्पो निवातोल्काप्रदर्शनम्। अकाले पुष्पिता वृक्षाः फलं चाकालसम्भवम् ॥१०७
अनिमित्तानि सर्वाणि दूरमागत्य निर्भरम्। अनिमित्तस्य नाशो यः सैंहिकेयकृतस्य च ॥१०८
नराणामासनं चैव गवां वा मानुषीगिरा। पक्षमात्रान्तरे तस्य पुत्रस्य मरणं दिशेत् ॥१०९
अयुतं जुहुयात्तत्र राहुमुद्दिश्य यत्नतः। शान्तिमत्र प्रवक्ष्यामि यया सम्पद्यते शुभम् ॥११०
दधिमधुघृताक्तं च कुर्याद्दूर्वाक्षतं तथा। कलायु इति मन्त्रेण जुहुयाद्रविवासरे ॥१११
चरुं च श्रपयेत्तत्र राहुमुद्दिश्य संश्रयात्। होमं कुर्यात्ततो गां च कपिलां[1] च पयस्विनीम् ॥११२
अतसीं तिलशङ्खौ वा वासोयुगमथापि वा। श्रद्धया राहुमुद्दिश्य दद्याद्विप्राय दक्षिणाम् ॥११३

---

दिन की भाँति रात्रि में भी राहु द्वारा ग्रस्त हुए सूर्य (सूर्यग्रहण) दिन में तारागण की भाँति राजाओं की मृत्यु का सूचक होता है। स्वर्ग में भी दुर्जेय समझे जाने वाले राजा की मंत्री समेत मृत्यु राष्ट्र द्वारा

दुरितस्य विनाशाय तस्य सम्पद्यते शुभम् । दधिमधुघृतक्षीरेण वारुणेन च वारुणे ॥११४
दृश्यते चाद्भुतं तेषु विशिष्टैर्दोषदर्शिभिः । गृही तत्र विनष्टश्च भवेत्सपशुबान्धवः ॥११५
दृश्यन्ते तत्र क्रौञ्चाश्च जम्बुका गृध्रवायसाः । दारुणं भीषणं घोरं नृत्यन्ति च हसन्ति च ॥११६
मैथुनानि च सर्वेषां यस्य वासे भवेद्यदि । मृत्युस्तस्य भवेदाशु ईश्वरस्य च शासनात् ॥११७
धूमकेतुर्यदा व्योम्नि ज्वलत्पावक सन्निभः । स्थानात्स्थानान्तरं याति भूमौ वा पतते भृशम् ॥
सबन्धुरस्यते राजा परचक्रैः स पीडितः ॥११८
दुर्भिक्षं मरणं चैव चिरं राष्ट्रे भविष्यति । गावो मर्कटकुम्भा व विशन्ते गृहवेश्मनि ॥११९
गावश्च तस्य नश्यन्ति दारापत्यधनानि च । अन्यस्य दोषो भवति गृहे यान्ति प्रमादतः ॥१२०
अब्दान्तरे भवेन्मृत्युर्विरजा हि भविष्यति । शान्तिमत्र प्रवक्ष्यामि यया सम्पद्यते शुभम् ॥१२१
सप्ताश्वरथसंयुक्तं हेमच्छत्रविभूषितम् । विप्राय मण्डपं दद्याद्बिल्वपत्रमथापि वा ॥१२२
ऐन्द्रेणैव तु मन्त्रेण होमः कार्यो द्विजातिभिः । अकस्माच्छालतालाक्षखदिरोत्पलसेरकाः ॥१२३
गृहमध्ये प्रजायेत केतोरद्भुतदर्शनम् । हंसो वा द्रोणकाको वा मयूरो वा गृहोपरि ॥१२४
गृहे तस्य महोत्पातः केतोरद्भुतदर्शनम् । शान्तिमत्र प्रवक्ष्यामि यया सम्पद्यते शुभम् ॥१२५
दधिमधुघृताक्तं च जुहुयादयुतं कुशम् । त्र्यम्बकं चेति मन्त्रेण केतवेभिवपेच्चरुम् ॥१२६
नीलां धेनुं सवत्सां च बहुक्षीरप्रदां तथा । मृत्तिकां हेमवासश्च नानालङ्कारमेव च ॥१२७

---

दुर्निमित्त के विनाशार्थ दही, शहद, घी एवं क्षीर की आहुति वारुण मंत्र द्वारा सुसम्पन्न करने से शुभ की प्राप्ति होती है । अन्यथा जो विशिष्ट दोष द्रष्टाओं को वे अशुभ-सूचक दुर्निमित्त दिखायी देते हैं उनके फल भी जैसे कि बताये गये हैं

**दक्षिणां च प्रवक्ष्यामि यस्य नास्ति प्रतिक्रिया। देवमुद्दिश्य दानेन होमेन चरुणा तथा ॥१२८**
**दक्षिणस्यां दिशिच्छायां यः पश्येदात्मनः स्वयम्। स्वच्छायां पादुकस्यैव पश्येत्पञ्चशिरोद्वयम्॥१२९**
**एवमेवैव यच्छिन्नं शिनष्टि च ततो हितम्। शीघ्रं नाशमवाप्नोति सप्ताहान्नात्र संशयः ॥१३०**
**उच्चावचान्प्रवक्ष्यामि यथा शास्त्रेण चोदितम्। काकमार्जारशूकानां कपोतानां विशेषतः ॥**
**मैथुनं दृश्यते तत्र तच्च राहोर्महाद्भुतम् ॥१३१**
**शनिमुद्दिश्य जुहुयादयुतं शनिवासरे। पूजयेदर्कपुष्पेण शतेन जुहुयाच्चरुम् ॥१३२**
**कृत्वा तत्रैव पश्येतशनेरद्भुतदर्शनम्। अष्टाविंशं चरुं कृत्वा ततः शान्तिर्भवेद्ध्रुवम् ॥१३३**
**भुजपदोस्तथा चक्षुःस्पन्दने मरणं दिशेत्। तत्तु सोमाद्भुतं विद्याद्वामदक्षिणतः क्रमात् ॥१३४**
**कृष्णपक्षे भवेद्वामे विपरीतेऽद्भुतं दिशेत्। अनिष्टसूचकं यस्मात्तस्माच्छान्ति प्रकल्पयेत् ॥१३५**
**शतार्द्धं रविमुद्दिश्य शान्त्यर्थे होममाचरेत्। चरुपाकविधानेन यवैस्तिलसुसर्पिषा ॥१३६**
**पुस्तके यज्ञसूत्रं च असत्पात्रे चरौ तु वा। शक्रवस्त्रप्रदग्धे च सूर्यस्याद्भुतदर्शनम् ॥१३७**
**हयमारं त्रिमध्वक्तं जुहुयादिष्टसिद्धये। देवपुस्तकरत्नानि मणिकाञ्चनमेव च ॥१३८**
**लोहितस्याद्भुतं विद्यात्सहस्रं च विशोधनम्। देवागारे तथा गोधा शङ्खिनी प्रविशेत्क्वचित् ॥१३९**

---

क्योंकि केतु के उद्देश्य से दान, हवन एवं खीर प्रदान की क्रियाओं द्वारा उसे इस भाँति शान्त कर दिया जाता है, जिससे पुनः कोई प्रतिक्रिया होने की संभावना नहीं रहती है। दक्षिण दिशा में जो अपनी छाया का स्वयं दर्शन करते हैं अथवा उसके साथ-साथ चरण पादुका के इस भाँति के दर्शन हों, जिसमें दश शिर की कल्पना-सी प्रतीत होती हो, और उस प्रकार छिन्न होकर मस्तक से चूर्ण हो जाये तो शुभ समझना चाहिए, अन्यथा सप्ताह के भीतर ही उसका शीघ्र नाश होता है, इसमें संदेह नहीं।१२४-१३०। मैं

द्रोणकाको बकश्चैव उलूकद्वयमेव च । रक्तकण्ठः कपोतश्च व्याघ्र एणश्च वा विशेत् ॥१४०
यस्य देवगृहं पश्येत्तस्य तस्यायुतं हुनेत् । न चात्र गृहवैकृत्यं हसनं यदि दृश्यते ॥
सम्पत्तिसूचकं गेहे मरणं दुःखदर्शनम् ॥१४१
क्रन्दने हतराज्येन गजाश्ववाहने क्वचित् । सूर्यमुद्दिश्य जुहुयादयुतं सर्वसिद्धये ॥१४२
प्रमादात्कम्पने हानिः स्वेदे जाते विपद्भवेत् । क्षीरस्रावे च रुधिरे तत्र राज्ये महद्भयम् ॥१४३
गोच्छागौ वाथ गोमायुर्गृहोपरि प्रनृत्यति । यदा रौति दिवा फेरुस्तदा नाशो भवेद् ध्रुवम् ॥१४४
श्वजम्बुकावथ व्याघ्रो यथाशक्ति च धावति । ईशाने महिषस्तद्वत्तदा देशे च विप्लवः ॥१४५
राहोरद्भुतमुद्दिश्य सहस्रं जुहुयाच्चरुम् । वृक्षाद्भुतं यदा पश्येत्तत्र तस्यां परित्यजेत् ॥
यद्गृहेषु हुतं याति देशविप्लवमादिशेत् ॥१४६
देशे वा नगरे ग्रामे आरण्यपशुबन्धनम् । सर्पे वा विपरीतं च मांसपिण्डमथापि वा ॥
तद्गृहे मरणं चैव देशविप्लवमादिशेत् ॥१४७
दिवाद्भुतेऽयुतं रात्रौ द्विगुणं च भवेद् ध्रुवम् । द्विगुणं चापि सन्ध्यायामर्धरात्रे चतुर्गुणम् ॥१४८
अकाले तत्र मरणमकाले गृहिणीमृतिः । सौराद्भुतं विजानीयादशुभे वा विशोधनम् ॥१४९
एकैकस्यायुतं यत्र कुर्यात्तत्रैव होमयेत् । साङ्गोपाङ्गेन सहितमष्टावष्टौ हुतं च वा ॥१५०
अधिप्रत्यधिसहितं गृहपक्षेऽपि सत्तमाः । तन्मानेन हुतं विप्रा कुर्यात्तत्रैव भूषणम् ॥१५१

---

(रक्त कण्ठ, कबूतर, व्याघ्र, मृग के प्रवेश होने पर उसके शान्त्यर्थ दश सहस्र की आहुति प्रदान करनी चाहिए। इनके हसने (मुख की प्रसन्नता) देखने से गृहसम्बन्धी कोई क्षति नहीं होती है, प्रत्युत सम्पत्ति की प्राप्ति होती है, इसी प्रकार उनकी दुःखी अवस्था का दर्शन मरण सूचक बताया गया है।१३९-१४१।

**एकैकस्याहुतं विप्रा अष्टावष्टौ हुतं च वा । अधिप्रत्यधिदेवानां याश्चान्याश्चाङ्गदेवताः ॥१५२**
**मानान्तं च ददेत्पूर्णां दत्त्वा पूर्णां न होमयेत् । वक्ष्ये ग्रहमखे मानं येन मानेन सिध्यति ॥१५३**
**अमानकरणे दोषस्तस्मान्मानं न हापयेत् । पङ्क्तिचत्वारिंशदाद्यैश्चतुर्धा विभजेन्नरः ॥१५४**
**अनिष्टाय ततो दद्याच्चरुहोमं विभागशः । अधिप्रत्यधिदेवानामष्टावष्टौ ह्युदाहृतम् ॥१५५**
**त्र्यम्बकादिषु मन्त्रेषु होमत्रयमुदाहृतम् । धनञ्जये तथा दद्याच्चरुहोमं विभागतः ॥१५६**
**आदित्यायाष्टावष्टावधिकं कल्पयेत्सुधीः । शतहोमे तु सर्वत्र दशाङ्गं कल्पयेन्नरः ॥१५७**
**अनिष्टाय युगाङ्गं तु ग्रहेभ्यो ह्यङ्गनाय च । अधिप्रत्यधिदेवानां तथैवाङ्गं प्रकल्पयेत् ॥१५८**
**द्वौ तु दद्यात्त्र्यम्बकाय तथा धनञ्जयाय च । तत्र होमो नायकाय सर्वत्रैव विचक्षणः ॥१५९**
**सहस्रे चैव विंशाङ्गे अनिष्टाय दशांशकम् । पञ्चांशेन ग्रहाणां च पञ्चांशेन यवानपि ॥१६०**
**तत्रानिष्टे पञ्चशतं तस्यार्धं ग्रहवाग्यतः । एकत्रिंशद्भवेन्मानम् अन्येषां तु चतुर्दश ॥१६१**
**ग्रहाधिकं होमयुगं तत्र भागे प्रकल्पयेत् । अधातये च तिथ्यङ्गं पञ्चाङ्गं यस्य चाद्भुत ॥१६२**
**ग्रहेभ्यश्चैव पञ्चाङ्गं तत्र वाङ्गं परानपि । एकैकाङ्गे भवेन्मानं षट्शतं षष्टिरेव च ॥१६३**
**अधिकं च भवेत्षष्टिर्दशमं भागशेषतः । अनिष्टांशे त्रिसहस्रं त्रिशतं त्रिंशतं तथा ॥१६४**

---

देव के लिए उसी मान से हवन करना उसकी शोभा वृद्धि करना है । विप्रवृन्द ! उन एक-एक अधिदेव, प्रत्यधि देव, और उसके अंग देवता के उद्देश्य से आठ-आठ आहुति जो माप दण्ड के अनुसार निश्चित है, प्रदान करना चाहिए । इसके उपरांत पूर्णाहुति प्रदान कर पुनः पूर्णाहुति के पश्चात् हवन के करने का विधान है । इसीलिए मैं गृह-यज्ञ में उस माप-दण्ड को बता रहा हूँ, जिसके उपयोग से उसकी सिद्धि प्राप्त

चतुःशतं ग्रहाणां च तथा सप्तशताधिकम् । उपग्रहेभ्यो दद्याच्च पञ्चाशीत्यधिकं शतम् ।।१६५
तिर्य्यङ्गभागः शेषेण ग्रहे सप्तशताधिकम् । एकैकं तु ग्रहस्यैवमादित्याय युगं भवेत् ।।१६६
ग्रहाङ्गे यः स्थितो भागो युगलं भागशेषतः । त्र्यम्बकाय च तद्दद्यात्तथा धनञ्जयाय च ।।१६७
शान्तिकै पौष्टिकै काम्यै यदीच्छेत्सुखमात्मनः । ग्रहाणां चायुतं होमं त्र्यहसाध्येन होमयेत् ।।१६८
त्र्यहसाध्ये विधानं यत्पुरैवोदीरितं द्विजाः । इदानीं प्रक्रमेणैव यो भागः स निगद्यते ।।१६९
पूर्वस्मिन्दिवसेऽनिष्टे सहस्रं त्रिशतोत्तरम् । इतरेषां ग्रहाणां च प्रत्येकं तु शतं शतम् ।।१७०
अधिप्रत्यधिदेवानां पञ्चाशद्धोम उच्यते । प्रथमेऽह्नि प्रदद्याच्च मिलित्वा त्रिसहस्रकम् ।।१७१
द्वितीयदिवसेऽनिष्टे द्विसहस्रमुदाहृतम् । प्रतिग्रहेभ्यस्त्रिशतं दद्यादष्टशताधिकम् ।।१७२
उपग्रहेभ्यो दद्याच्च षोडशेभ्यो यथाक्रमम् । एकाशीतिं ददौ यत्नादशीतिं चान्त्ययोर्द्वयोः ।।१७३
एवं द्वितीयदिवसे मिलित्वा षट्सहस्रकम् । अनिष्टाय त्रिशतं तु तृतीयदिवसे मतम् ।।१७४
तत्प्रत्येकं ग्रहाणां च द्वाचत्वारिंशदुच्यते । अधिप्रत्यधिदेवानां प्रत्येकं पञ्चत्रिंशकम् ।।१७५
तृतीयदिवसे दद्यान्मिलित्वैकसहस्रकम् । आदित्याय युगं दद्यादेकं तु त्र्यम्बकाय च ।।१७६
धनञ्जयाय होमैकमेकं चायुतमुच्यते । तदर्धकं ग्रहेभ्यश्च इतरेभ्यस्तदर्धकम् ।।१७७

---

उपग्रहों के लिए एक सौ पचासी भाग की कल्पना की जाती है । शेष पन्द्रहवाँ भाग जो ग्रहों के लिए समस्त सात सौ से भी अधिक बताया गया है, ग्रहों के लिए एक-एक भाग और आदित्य के लिए चार भाग की कल्पना की जाती है । ग्रहांगों के लिए स्थित शेष दो भाग त्र्यम्बक और धनंजय के लिए अर्पित करना

**ग्रहाणां त्रिसहस्रं तु पञ्चानां च सहस्रकम् । त्रिसहस्रं भागशेषमादित्याय सहस्रकम् ।।१७८**
**त्र्यम्बकाय तथादद्यात्तथा धनञ्जयाय च । षट्पादाधिकषटषट्कसहस्रपरिसङ्ख्यया ।।**
**नवश्लोकशतोद्भुतं सम्पूर्णं स्याद्भविष्यकम् ।।१७९**

**इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे ग्रहोपद्रवोत्पातशान्तिवर्णनं नाम विंशोऽध्यायः ।२०**

---

ग्रहों के लिए तीन हजार तथा पंचदेव के लिए एक हजार तथा आदित्य के लिए पूर्वोक्त में तीन हजार से भाग देने पर शेष एक हजार आहुति देनी चाहिए । त्र्यम्बक के लिए एक हजार धनञ्जय के लिए भी एक हजार आहुति-प्रदान करनी चाहिए ।१७८-१७९

श्री भविष्यमहापुराण में मध्यम-पर्व के तृतीयभाग में ग्रहों के उपद्रव-उत्पात-शान्ति वर्णन नामक बीसवाँ अध्याय समाप्त ।२०।

# भविष्यपुराणम्—प्रतिसर्गपर्व

# अथ प्रतिसर्गपर्वणि

## प्रथमोऽध्यायः

### कृतयुगभूपाख्यानम्

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् । देवीं सरस्वतीं व्यासं[1] ततो जयमुदीरयेत् ॥

**शौनक उवाच**

भविष्याख्ये महाकल्पे ब्रह्मायुषि परार्द्धके । प्रथमेऽब्दे ह्नि तृतीये प्राप्ते वैवस्वतेऽन्तरे ॥१
अष्टाविंशे सत्ययुगे के राजानोऽभवन्मुने । तेषां राज्यस्य वर्षाणि तन्मे वद विचक्षण ॥२

**सूत उवाच**

कल्पाख्ये श्वेतवाराहे ब्रह्माब्दस्य दिनत्रये । प्राप्ते सप्तमुहूर्ते च मनुर्वैवस्वतोऽभवत् ॥३
स तप्त्वा सरयूतीरे तपो दिव्यं शतं समाः । तच्छिक्कातोऽभवत्पुत्र इक्ष्वाकुः स महीपतिः ॥४
ब्रह्मणो वरदानेन दिव्यं यानं स आप्तवान् । नारायणं पूजयित्वा हरौ राज्यं निवेद्य च ॥५
षट्त्रिंशच्च सहस्राणामब्दं राज्यं तदाऽकरोत् । तस्माज्जातो विकुक्षिश्च शतहीनं[2] तदब्दकम् ॥६
राज्यं कृत्वा दिवं यातस्तस्माज्जातो रिपुञ्जयः । शतहीनं कृतं राज्यं तत्ककुत्स्थसुतः स्मृतः ॥७

---

## अध्याय १

### सत्ययुग के राजाओं का वर्णन

शतहीनं कृतं राज्यं ततोऽनेनांस आत्मजः । शतहीनं कृतं राज्यं तस्माज्जातो नृपः पृथुः ॥८
शतहीनं कृतं राज्यं विष्वगश्वश्च तत्सुतः । शतहीनं कृतं राज्यं तस्मादार्द्रो नृपोऽभवत् ॥९
शतहीनं कृतं राज्यं भद्राश्वस्तत्सुतोऽभवत् । शतहीनं कृतं राज्यं युवनाश्वस्तु तत्सुतः ॥१०
शतहीनं कृतं राज्यं श्रवस्थस्तत्सुतोऽभवत् । सत्यपादश्च सञ्जातः प्रथमो भारतेऽन्तरे ॥११
उदयादस्तपर्यन्तं तैर्नृपैर्भूमिमण्डलम् । भुक्तं नीतिपरैर्देवैः श्रवस्थेन तु भूतले ॥
शतहीनं कृतं राज्यं बृहदश्वस्ततोऽभवत् ॥१२
शतहीनं कृतं राज्यं तस्मात्कुवलयाश्वकः । शतहीनं कृतं राज्यं दृढाश्वस्तत्सुतोऽभवत् ॥१३
सहस्रहीनं राज्यं तद्भवणाश्वस्तु निकुम्भकः । सहस्रहीनं राज्यं तत्सङ्कटाश्वस्तु तत्सुतः ॥१४
सहस्रहीनं राज्यं तत्तस्माज्जातः प्रसेनजित् । सहस्रहीनं राज्यं तद्भवणाश्वस्तु तत्सुतः ॥१५
सहस्रहीनं राज्यं तन्मान्धाता तत्सुतोऽभवत् । शतहीनं कृतं राज्यं पुरुकुत्सस्तु तत्सुतः ॥१६
शतहीनं कृतं राज्यं त्रिंशदश्वस्तु तत्सुतः । रथे यस्य स्मृता वाहा वाजिनस्त्रिंशतो वराः ॥१७
अनरण्यस्ततो जातो ह्यष्टाविंशत्सहस्रकम् । राज्यं द्वितीयचरणे स्मृतं सत्ययुगस्य वै ॥१८
पृषदश्वस्ततो जातो राज्यं षष्ठसहस्रकम् । तदब्दं भूतले कृत्वा पितृलोकमुपाययौ ॥१९
हर्यश्वस्तु ततो जातो विष्णुभक्तकुले नृपः । सहस्रहीनं राज्यं तत्तत्सुतो वसुमांस्मृतः ॥२०
सहस्रहीनं राज्यं तत्त्रिधन्वा तनयस्ततः । सहस्रहीनं राज्यं तत्तेन राज्ञा च सत्कृतम् ॥२१

---

उसने भी उनसे सौ वर्ष कम समय तक राज्य किया । पश्चात् उसके अंस नामक पुत्र उत्पन्न हुआ । उसके भी (अपने पिता से) सौ वर्ष कम राज्य-काल के उपरांत पृथु नामक राजा उत्पन्न हुआ । इस प्रकार पृथु

सत्यपादः समाप्तोऽयं द्वितीयो भारतेऽन्तरे । त्रिधन्वनश्च नृपतेस्त्रपारण्यस्तु वै सुतः ॥२२
सहस्रहीनं राज्यं तत्कृत्वा स्वर्गमुपाययौ । तस्माज्जातस्त्रिशङ्कुश्च राज्यं वर्षसहस्रकम् ॥२३
छद्मना हीनतां जातो हरिश्चन्द्रस्तु तत्सुतः । राज्यं विंशत्सहस्रं च रोहितो नाम तत्सुतः ॥२४
पितुस्तुल्यं कृतं राज्यं हारीतस्तनयोऽभवत् । पितुस्तुल्यं कृतं राज्यं चञ्चुभूपश्च तत्सुतः ॥२५
पितुस्तुल्यं हि राज्यं तद्विजयो नाम तत्सुतः । पितुस्तुल्यं हि राज्यं तद्रुरूकस्तनयस्ततः ॥२६
पितुस्तुल्यं कृतं राज्यं सगरस्तनयोऽभवत् । भूपाश्च बाहुसेनान्ता वैष्णवाः परिकीर्तिताः ॥२७
राज्यमानं कृतं सम्यग्भूपैर्वैवस्वतादिभिः । मणिस्वर्णसमृद्धिश्च बह्वन्नं बहुदुग्धकम् ॥२८
पूर्णो धर्मस्तदा भूम्यां मुने सत्ययुगस्य वै । तृतीयचरणे मध्ये सगरो नाम भूपतिः ॥२९
शिवभक्तः सदाचारस्तत्पुत्राः सागराः स्मृताः । त्रिंशत्सहस्रवर्षं तद्राज्यं वै मुनिभिः स्मृतम् ॥३०
नष्टेषु सागरेष्वेवमसमञ्जस आत्मजः । शतहीनं कृतं राज्यमंशुमांस्तत्सुतोऽभवत् ॥३१
शतहीनं कृतं राज्यं दिलीपस्तत्सुतोऽभवत् । शतहीनं कृतं राज्यं तस्माज्जातो भगीरथः ॥३२
शतहीनं कृतं राज्यं श्रुतसेनस्ततोऽभवत् । शतहीनं कृतं राज्यं नाभागस्तनयस्ततः ॥३३
शतहीनं कृतं राज्यमम्बरीषस्ततोऽभवत् । शैवाः षट् श्रुतसेनान्ता नाभागो वैष्णवो नृपः ॥३४
सत्यपादः समाप्तोऽयं तृतीयो भारतेऽन्तरे । अम्बरीषेण भूपेन शतहीनं कृतं पदम् ॥३५
चतुर्थे चरणे तस्य चाष्टादश सहस्रकम् । अब्दं राज्यं शुभं ज्ञातं कर्मभूम्यां च भारते ॥३६

---

का दूसराचरण समाप्त हुआ, ऐसा कहा गया है ।१४-२१। राजा त्रिधन्वा के त्रपारण्य नामक पुत्र हुआ,

एकोनत्रिंशद्वर्षाणि राज्यं तत्त्रिंशतानि च। शतहीनं कृतं राज्यं सिन्धुद्वीपोऽम्बरीषजः ॥३७
शतहीनं कृतं राज्यमयुताश्वस्ततोऽभवत्। शतहीनं कृतं राज्यमृतुपर्णस्तु तत्सुतः ॥३८
शतहीनं कृतं राज्यं सर्वकामो नृपस्ततः। शतहीनं कृतं राज्यं नृपः कल्माषपादकः ॥३९
शतहीनं कृत राज्यं सुदासस्तनयोऽभवत्। तस्मादश्मकश्चैव मदयन्त्या वशिष्ठजः ॥४०
शतहीनं कृत राज्यं हरिवर्मा ततोऽभवत्। सप्त भूपाः सुदासान्ता वैष्णवाः परिकीर्तिताः ॥४१
गुरुशापात्तु सौदासो राज्याङ्गं गुरवेऽर्पयत्। गोकर्णलिङ्गभक्तश्च शैवः समय उच्यते ।४२
हरिवर्मा शमकजो वैश्यवत्साधुपूजकः। ऊनत्रिंशत्सहस्राणि तथा सप्तशतानि वै ॥४३
हरिवर्माऽकरोद्राज्यं तस्माद्दशरथोऽभवत्। पितुस्तुल्यं कृतं राज्यं तस्माद्दिल्लीवयस्सुतः ॥४४
पितुस्तुल्यं कृतं राज्यं भूपो विश्वासहस्ततः। राज्यं दशसहस्रं तन्नियज्ञः प्राकृतो नृपः ॥४५
तदधर्मप्रतापेन ह्यनावृष्टिस्तदाऽभवत्। शतवर्षमनावृष्टिस्सर्वराज्यं व्यनाशयत् ॥४६
यज्ञं कृत्वा वशिष्ठस्तु राज्ञीवचनतत्परः। यज्ञात्खट्वांग उत्पन्नः खट्वांगं शस्त्रमुद्वहन् ॥४७
इन्द्रसाहाय्यमगमद्राज्यं त्रिंशत्सहस्रकम्। कृत्वा तत्र वरं लब्ध्वा देवेभ्यो मुक्तितां गतः ॥४८
खट्वांगाद्दीर्घबाहुश्च राज्यं विंशत्सहस्रकम्। तस्मात्सुदर्शनो जातो देवीपूजनतत्परः ॥४९
वैष्णवा दाशरथ्यं तास्त्रयो विख्यातसद्बलाः। खट्वांगो दीर्घबाहुश्च वैष्णवौ परिकीर्तितौ ॥५०
सुदर्शनो महाप्राज्ञः काशीराजसुतां नृपः। उद्वाह्य भूपतीञ्जित्वा भूपसेवाप्रसादतः ।५१

---

बहुत सुखदायक बताया जाता है। राजा अम्बरीश के सिन्धुद्वीप नामक पुत्र हुए, जिन्होंने उनसे उन्तीस, तीस एवं सौ वर्ष कम राज्य किया था। सिन्धुद्वीप के अयुताश्व, अयुताश्व के ऋतुपर्ण, ऋतुपर्ण के सर्वकाम, सर्वकाम के कल्मषपाद, कल्मषपाद के सौदास और सौदास की स्त्री मदयन्ती में वशिष्ठ द्वारा राजा अश्मक

राज्यं भरतखण्डान्तमदधद्धर्मतो नृपः । वर्षपञ्चसहस्राणि राज्यं चक्रे स भूपतिः ॥५२
स्वप्नमध्ये वचः प्रोक्तं महाकाल्या नृपाय वै । वत्स त्वं प्रियया सार्द्धं वशिष्ठादिभिरन्वितः ॥५३
हिमालयं गिरिं प्राप्य वासं कुरु महामते । महावायुप्रभावेन क्षयो भरतखण्डके ॥५४
रत्नाकरः पश्चिमोऽब्धिस्तस्य द्वीपाः क्षयं गताः । महोदधिः पूर्वतोऽब्धिस्तस्य द्वीपा क्षयं गताः ॥५५
वाडवोऽब्धिर्दक्षिणे च तस्य द्वीपाः क्षयं गताः । हिमाब्धिरुत्तरे तस्य सगरैः खनितो हि सः ॥५६
ये द्वीपास्तु सुविख्यातास्तेऽपि सर्वे लयं गताः । भारतो वर्ष एवासौ वत्सरे सप्तमेऽहनि ॥५७
सजीवः प्रलयं यायात्तस्मात्त्वं जीवितो भव । तथेति मत्वा स नृपः पर्वतं वै हिमालयम् ॥५८
प्राप्तवान्मुख्यभूपैश्च मुख्यवैश्यैर्द्विजैः सह । पञ्चवर्षप्रमाणेन वायुस्तेजः क्रमाज्जलम् ॥५९
शर्करा च महीं प्राप्तस्ततो जीवाः क्षयं गताः । पञ्चवर्षमिते काले जलं जाता वसुन्धरा ॥६०
शान्ता भूत्वा पुनर्वायुर्जलं सर्वमशोषयत् । दशवर्षान्तरे भूमिः स्थली भूत्वा प्रदृश्यते ॥६१

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये
कृतयुगभूपाख्यानं नाम प्रथमोऽध्यायः ।१

---

युद्धस्थल में राजाओं पर विजय प्राप्त किया, पश्चात् भरतखण्ड का यह समस्त राज्य अपने अधिकार में करके पाँच सहस्र वर्ष तक इसका उपभोग किया तदुपरांत भगवती महाकाली ने स्वप्न में उस राजा से कहा—वत्स ! महामते ! तू अपनी धर्म-पत्नी एवं वशिष्ठादि महर्षियों समेत हिमालय पर्वत पर जाकर

# अथ द्वितीयोऽध्यायः

## त्रेतायुगभूपाख्यानवर्णनम्

### सूत उवाच

वैशाखशुक्लपक्षे तु तृतीयागुरुवासरे । सुदर्शनो जनैः सार्द्धमयोध्यामगमत्पुनः ।।१
मायादेवीप्रभावेण पुरं सर्वं मनोहरम् । महावृद्धियुतं प्राप्तं बह्वन्नं सर्वरत्नकम् ।।२
दशवर्षसहस्राणि राज्यं कृत्वा सुदर्शनः । प्राप्तवाञ्छाश्वतं लोकं दिलीपस्तत्सुतोऽभवत् ।।३
नन्दिनीवरदानेन तत्पुत्रो रघुरुत्तमः । दशवर्षसहस्राणि दिलीपो राज्यसत्कृतः ।।४
राज्यं कृतं च रघुणा दिलीपान्ते पितुस्समम् । रघुवंशस्ततः ख्यातस्त्रेतायां भृगुनन्दन ।।५
विप्रस्य वरदानेन तत्पुत्रोऽज इति स्मृतः । पितुस्तुल्यं कृतं राज्यं तस्माद्दशरथोऽभवत् ।।६
पितुस्तुल्यं कृतं राज्यं तस्माद्रामो हरिः स्वयम् । एकादश सहस्राणि रामराज्यं प्रकीर्तितम् ।।७
तस्य पुत्रः कुशो नाम राज्यं दशसहस्रकम् । अतिथिर्नाम तत्पुत्रः कृतं राज्यं पितुः समम् ।।८
निबन्धो नाम तत्पुत्रः कृतं राज्यं पितुस्समम् । तस्माज्जातो नलो नाम त्रेतायां शक्तिपूजकः ।।९
पितुस्तुल्यं कृतं राज्यं तस्मान्नाभः सुतोऽभवत् । पितुस्तुल्यं कृतं राज्यं पुण्डरीकः सुतोऽभवत् ।।१०
पितुस्तुल्यं कृतं राज्यं क्षेमधन्वा तु तत्सुतः । पितुस्तुल्यं कृतं राज्यं द्वारको नाम तत्सुतः ।।११
पितुस्तुल्यं कृतं राज्यं तस्माज्जातो ह्यहीनजः । पितुस्तुल्यं कृतं राज्यं कुरुर्नाम सुतस्ततः ।।१२

---

# अध्याय २

कुरुक्षेत्रं कृतं तेन त्रेतायां शतयोजनम् । त्रेतापादस्समाप्तोऽयं प्रथमो भारतेऽन्तरे ॥१३
पितुस्तुल्यं कृतं राज्यं पारियात्रः सुतोऽभवत् । पितुस्तुल्यं कृतं राज्यं दलपालस्सुतस्ततः ॥१४
पितुस्तुल्यं कृतं राज्यं छद्मकारी तु तत्सुतः । पितुस्तुल्यं कृतं राज्यं तस्मादुक्थः सुतोऽभवत् ॥१५
पितुस्तुल्यं कृतं राज्यं वज्रनाभिस्ततोऽभवत् । पितुस्तुल्यं कृतं राज्यं शंखनाभिस्ततोऽभवत् ॥१६
पितुस्तुल्यं कृतं राज्यं व्युत्थनाभिस्ततोऽभवत् । पितुस्तुल्यं कृतं राज्यं विश्वपालस्ततोऽभवत् ॥१७
पितुस्तुल्यं कृतं राज्यं स्वर्णनाभिस्तु तत्सुतः । पितुस्तुल्यं कृतं राज्यं पुष्पसेनस्तु तत्सुतः ॥१८
पितुस्तुल्यं कृतं राज्यं ध्रुवसन्धिस्तु तत्सुतः । पितुस्तुल्यं कृतं राज्यमपवर्मा तु तत्सुतः ॥१९
पितुस्तुल्यं कृत राज्यं शीघ्रगन्ता तु तत्सुतः । पितुस्तुल्यं कृतं राज्यं मरुपालस्तु तत्सुतः ॥२०
पितुस्तुल्यं कृतं राज्यं प्रसूवश्रुत उच्यते । पितुस्तुल्यं कृतं राज्यं सुसन्धिस्तनयोऽभवत् ॥
त्रेतापादः समाप्तोऽयं प्रथमो भारतेऽन्तरे ॥२१
उदयादुदयं यावद्राज्ञा तत्र सुसंधिना । पितुस्तुल्यं कृतं राज्यं मामर्बस्तनयस्ततः ॥२२
पितुस्तुल्यं कृतं राज्यं महाऽश्वस्तनयोऽभवत् । पितुस्तुल्यं कृतं राज्यं बृहद्बालः सुतस्ततः ॥२३
पितुस्तुल्यं कृतं राज्यं बृहदैशान एव तत् । पितुस्तुल्यं कृतं राज्यमुरुक्षेपस्ततोऽभवत् ॥२४
पितुस्तुल्यं कृतं राज्यं वत्सपालस्तु तत्सुतः । पितुस्तुल्यं कृतं राज्यं वत्सव्यूहस्ततोऽभवत् ॥२५
पितुस्तुल्यं कृतं राज्यं प्रतिव्योमा ततो नृपः । पितुस्तुल्यं कृतं राज्यं सुतो देवकरस्ततः ॥२६
पितुस्तुल्यं कृतं राज्यं सहदेवस्ततोऽभवत् । पितुस्तुल्यं कृतं राज्यं बृहदश्वस्ततो नृपः ॥२७
पितुस्तुल्यं कृतं राज्यं भानुरत्नस्ततोऽभवत् । पितुस्तुल्यं कृतं राज्यं सुप्रतीकस्ततोऽभवत् ॥२८
पितुस्तुल्यं कृतं राज्यं मरुदेवस्सुतस्ततः । पितुस्तुल्यं कृतं राज्यं सुनक्षत्रस्ततोऽभवत् ॥२९
पितुस्तुल्यं कृतं राज्यं सुतः केशीनरस्ततः । पितुस्तुल्यं कृतं राज्यमन्तरिक्षस्ततो नृपः ॥३०
पितुस्तुल्यं कृतं राज्यं सुवर्णांगो नृपोऽभवत् । पितुस्तुल्यं कृतं राज्यं तस्य पुत्रो ह्यमित्रजित् ॥३१
पितुस्तुल्यं कृतं राज्यं बृहद्राजस्ततोऽभवत् ॥३२

---

प्रकार भारत के अवान्तर प्रदेश में त्रेतायुग का पहला चरण समाप्त हुआ।१-१३। राजा कुरु के पारियात्र, पारियात्र के दलपाल, दलपाल के छद्मकारी, छद्मकारी के उक्थ, उक्थ के वज्रनाभि, वज्रनाभि के शंखनाभि, शंखनाभि के व्युत्थिताभि व्युत्थिताभि के विश्वपाल, विश्वपाल के स्वर्णनाभि, स्वर्णनाभि के पुष्पसेन, पुष्पसेन के ध्रुवसन्धि, ध्रुवसन्धि के अपवर्मा, अपवर्मा के शीघ्रगंता, शीघ्रगंता के

पितुस्तुल्यं कृतं राज्यं धर्मराजस्ततो नृपः। पितुस्तुल्यं कृतं राज्यं तस्माज्जातः कृतञ्जयः ॥३३
पितुस्तुल्यं कृतं राज्यं तस्माज्जातो रणञ्जयः। पितुस्तुल्यं कृतं राज्यं सञ्जयस्तत्सुतः स्मृतः ॥३४
पितुस्तुल्यं कृतं राज्यं तत्पुत्रः शाक्यवर्धनः। पितुस्तुल्यं कृतं राज्यं क्रोधदानस्तु तत्सुतः ॥३५
पितुस्तुल्यं कृतं राज्यं तस्मादतुलविक्रमः। पितुस्तुल्यं कृतं राज्यं तस्माज्जातः प्रसेनजित् ॥३६
पितुस्तुल्यं कृतं राज्यं तत्पुत्रः शूद्रकः स्मृतः। पितुस्तुल्यं कृतं राज्यं सुरथस्तत्सुतोऽभवत् ॥३७
पितुरर्द्धं कृतं राज्यं सर्वे तु रघुवंशजाः। पञ्चषष्टिमिता भूपा देवीपूजनतत्पराः ॥३८
हिंसायज्ञपराः सर्वे स्वर्गलोकमितो गताः। बुद्धा जाताश्च ये पुत्रास्ते सर्वे वर्णसङ्कराः ॥३९
त्रेतातृतीयचरणप्रारम्भेन नवतां गताः। इन्द्रेण प्रेषितो भूमौ चन्द्रमा रोहिणीपतिः ॥४०
प्रयागनगरे रम्ये भूमिराज्यमचीकरत्। विष्णुभक्तश्चन्द्रमाश्च शिवपूजनतत्परः ॥४१
मायादेवीप्रसन्नार्थे शतं यज्ञमचीकरत्। अष्टादशसहस्राणि राज्यं कृत्वा दिवं गतः ॥४२
तस्य पुत्रो बुधो नाम मेरुदेवस्य वै सुतः। इलामुद्वाह्य धर्मेण तस्माज्जातः पुरूरवाः ॥४३
चतुर्दशसहस्राणि भूमिराज्यमचीकरत्। उर्वशीं सोऽपि स्वर्वेश्यां समये नैव भोग्यवान् ॥४४
आयुर्नाम सुतो जातो धर्मात्मा विष्णुतत्परः। षट्त्रिंशच्च सहस्राणि राज्यं कृत्वा पुरूरवाः ॥४५
गन्धर्वलोकं सम्प्राप्य मोदते दिवि देववत्। पितुस्तुल्यं कृतं राज्यमायुषो नहुषस्सुतः ॥४६
पितुस्तुल्यं कृतं राज्यं ततः शक्रत्वमागतः। त्रिलोकीं स्ववशं चक्रे वर्षमेकसहस्रकम् ॥४७
मुनेर्दुर्वाससः शापान्नृपोऽजगरतां गतः। पञ्च पुत्रा ययातेश्च त्रयो म्लेच्छत्वमागताः ॥४८
द्वौ तथार्यत्वमापन्नौ यदुर्ज्येष्ठः पुरुर्लघुः। तपोबलप्रभावेण राज्यं लक्षाब्दसंमितम् ॥४९
कृत्वा विष्णुप्रसादेन ततो वैकुण्ठमागतः। यदोः पुत्रः स्मृतः क्रोष्टा राज्यं षष्टिसहस्रकम् ॥५०

वृजिनघ्नस्सुतस्तस्माद्राज्यं विंशत्सहस्रकम् । तस्मात्स्वाहार्चनः पुत्रः कृतं राज्यं पितुस्समम् ॥५१
तस्माच्चित्ररथः पुत्रः कृतं राज्यं पितुस्समम् । अरविन्दस्सुतस्तस्मात्कृतं राज्यं पितुः समम् ॥५२
अथ श्रवास्ततो जातस्तेजस्वी विष्णुतत्परः । पितुरर्द्धं कृतं राज्यं तत्पुत्रस्तामसः स्मृतः ॥५३
पितुस्तुल्यं कृतं राज्यं तस्मादुशनस्सुतः । पितुस्तुल्यं कृतं राज्यं शीतांशुकनृपोऽभवत् ॥ ॥५४
पितुस्तुल्यं कृतं राज्यं कमलांशुस्ततोऽभवत् ॥५५
पितुस्तुल्यं कृतं राज्यं पारावतसुतस्ततः । पितुस्तुल्यं कृतं राज्यं जामघस्तत्सुतोऽभवत् ॥५६
पितुस्तुल्यं कृतं राज्यं विदर्भस्तत्सुतोऽभवत् । पितुस्तुल्यं कृतं राज्यं क्राथो नाम सुतस्ततः ॥५७
पितुस्तुल्यं कृतं राज्यं कुन्तिभोजस्तु तत्सुतः । पुरुर्दैत्यसुतापुत्रः पाताले वृषपर्वणः ॥५८
उषित्वा नगरे तस्मिन्मायाविद्यस्ततोऽभवत् । प्रयागस्य प्रतिष्ठाने पुरे राज्यमथाकरोत् ॥५९
दशवर्षसहस्राणि राज्यं कृत्वा दिवं गतः । देवीभक्तः स नृपतिस्तत्पुत्रो जनमेजयः ॥६०
पितुस्तुल्यं कृतं राज्यं प्रचिन्वांस्तत्सुतोऽभवत् । पितुस्तुल्यं कृतं राज्यं प्रवीरस्तनयोऽभवत् ॥६१
पितुस्तुल्यं कृतं राज्यं नभस्यस्तनयोऽभवत् । पितुस्तुल्यं कृतं राज्यं भवदस्तत्सुतस्स्मृतः ॥६२
पितुस्तुल्यं कृतं राज्यं सुद्युम्नस्तनयोऽभवत् । पितुस्तुल्यं कृतं राज्यं पुत्रो बाहुगरः स्मृतः ॥६३
पितुस्तुल्यं कृतं राज्यं संयातिस्तनयोऽभवत् । पितुस्तुल्यं कृतं राज्यं धनयातिस्ततोऽभवत् ॥६४

---

सहस्र वर्ष राज्य का उपभोग करके गन्धर्वलोक में आज भी देवताओं की भाँति आनन्दानुभव कर रहे हैं। उनका पुत्र आयु भी अपने पिता के समान समय तक राज्यभार का वहन किया था। पुनः आयु के पुत्र नहुष हुए जो अपने पिता के समान काल तक राज्य का उपभोग कर पश्चात् इन्द्र बनाये गये थे। उन्होंने

पितुस्तुल्यं कृतं राज्यमैन्द्राश्वस्तनयोऽभवत् । पितुस्तुल्यं कृतं राज्यं तस्माद्रन्तिनरः सुतः ॥६५
पितुस्तुल्यं कृतं राज्यं तत्पुत्रः सुतपाः स्मृतः । पितुस्तुल्यं कृतं राज्यं सवरणस्तनयस्ततः ॥६६
हिमालयगिरौ प्राप्ते तपः कर्तुं मनो दधत् । शतवर्षं ततः सूर्यस्तपतीं नाम कन्यकाम् ॥६७
संवरणाय ददौ तुष्टो रविलोकं नृपो गतः । ततो मायाप्रभावेन युगं प्रलयमागतम् ॥६८
चत्वारः सागरा वृद्धा भारतं क्षयतां गतम् । द्विवर्षे सागरे भूमिरुषित्वा भूधरैस्सह ॥६९
महावायुप्रभावेन सागराः शुष्कतां गताः । अगस्त्यतेजसा भूमिः स्थली भूत्वा प्रदृश्यते ॥७०
पञ्चवर्षान्तरे भूमिर्वृक्षदूर्वादिसंयुता । सूर्याज्ञया च संवर्णस्तपत्या मुनिना सह ॥७१
वशिष्ठेन त्रिवर्णैश्च मुख्यैः सार्धं समागतः ॥७२

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये त्रेतायुगभूपाख्यानं नाम द्वितीयोऽध्यायः ।२

# अथ तृतीयोऽध्यायः

## द्वापरनृपोपाख्यानवर्णनम्

### सूत उवाच

संवर्णश्च महीपालः कस्मिन्काले समागतः । लोमहर्षण मे ब्रूहि द्वापरस्य नृपांस्तथा ॥१

---

धनयाति, धनयाति के ऐन्द्राश्व, ऐन्द्राश्व के रंतिनर, रंतिनर के सुतपा, और सुतपा के संवरण हुए, जिसने हिमालय पर्वत पर जाकर सौ वर्ष तक तप किया। उनके तपश्चर्या से प्रसन्न होकर सूर्य ने उन्हें अपनी तपन्ती नाम की कन्या प्रदान की। पुनः राजा सूर्य लोक चले गये। तदुपरांत माया के प्रभाव से युगप्रलय

## सूत उवाच

भाद्रस्य कृष्णपक्षे तु त्रयोदश्यां भृगौ दिने । संवर्णे मुनिभिः सार्द्धं प्रतिष्ठाने समागतः ॥२
प्रतिष्ठानं कृतं रम्यं पञ्चयोजनमायतम् । अर्धकोशोन्नतं हर्म्यं रचितं विश्वकर्मणा ॥३
बुद्धिवंशे प्रसेनस्य सत्ताया भूपतिः कृतः । यदुवंशे सात्वतश्च मधुराभूपतिः कृतः ॥४
म्लेच्छवंशे श्मश्रुपालो मरुदेशस्य भूपतिः । क्रमेण वर्द्धिता भूपाः प्रजाभिः सहिता भुवि ॥५
दशवर्षसहस्राणि संवर्णो भूपतिःस्मृतः । तस्यात्मजोऽयमर्चाज्ञः कृतं राज्यं पितुस्समम् ॥६
तस्य पुत्रः सूरिजापी पितुरर्द्धं च राज्यकृत् । सूर्ययज्ञस्तस्य पुत्रः सौरयज्ञपरायणः ॥७
शतहीनं कृतं राज्यं तस्मादातिथ्यवर्धनः । शतहीनं कृतं राज्यं द्वादशात्मा तु तत्सुतः ॥८
शतहीनं कृतं राज्यं तस्माज्जातो दिवाकरः । शतहीनं कृतं राज्यं तस्माज्जातः प्रभाकरः ॥९
शतहीनं कृतं राज्यं भास्वदात्मा च तत्सुतः । शतहीनं कृतं राज्यं विवस्वज्ज्ञस्तदात्मजः ॥१०
शतहीनं कृतं राज्यं हरिदश्वार्चनस्ततः । शतहीनं कृतं राज्यं तस्माद्वैकर्तनः सुतः ॥११
शतहीनं कृतं राज्यं स्तस्मादर्केष्टिमान्सुतः । शतहीनं कृतं राज्यं तस्मान्मार्तण्डवत्सलः ॥१२
शतहीनं कृतं राज्यं मिहिरार्थस्तु तत्सुतः । शतहीनं कृतं राज्यं तस्मादरुणपोषणः ॥१३
शतहीनं कृतं राज्यं तस्माद्द्युमणिवत्सलः । शतहीनं कृतं राज्यं तस्मात्तरणियज्ञकः ॥१४
शतहीनं कृतं राज्यं तस्मान्मैत्रेष्टिवर्धनः । शतहीनं कृतं राज्यं चित्रभानुस्सुतस्ततः ॥१५
शतहीनं कृतं राज्यं तस्माद्वैरोचनः स्मृतः । शतहीनं कृतं राज्यं हंसन्यायी तु तत्सुतः ॥१६
पितुस्तुल्यं कृतं राज्यं तस्माद्वेदप्रवर्धनः । शतहीनं कृतं राज्यं तस्मात्सावित्र उच्यते ॥१७
शतहीनं कृतं राज्यं धनपालस्ततोऽभवत् । शतहीनं कृतं राज्यं म्लेच्छहन्तसुतः स्मृतः ॥१८

---

**सूत जी बोले**—भादों मास के कृष्णपक्ष की त्रयोदशी शुक्रवार के दिन मुनियों के साथ राजा संवर्ण

शतहीनं कृतं राज्यं तस्मादानन्दवर्द्धनः । शतहीनं कृतं राज्यं धर्मपालसुतस्ततः ॥१९
शतहीनं कृतं राज्यं ब्रह्मभक्तसुतस्ततः । पितुस्तुल्यं कृतं राज्यं तस्माद्ब्रह्मोष्टिवर्द्धनः ॥२०
पितुस्तुल्यं कृतं राज्यं तस्मादात्मप्रपूजकः । पितुस्तुल्यं कृतं राज्यं परमेष्ठी सुतस्ततः ॥२१
पितुस्तुल्यं कृतं राज्यं तस्माद्धैरण्यवर्द्धनः । शतहीनं कृतं राज्यं धातृयाजी तु तत्सुतः ॥२२
पितुस्तुल्यं कृतं राज्यं तद्विधातृप्रपूजकः । पितुस्तुल्यं कृतं राज्यं तस्माद्वैद्रुहिणः क्रतुः ॥२३
पितुस्तुल्यं कृतं राज्यं तस्माद्वैरञ्च्य उच्यते । शतहीनं कृतं राज्यं तत्पुत्रः कमलासनः ॥२४
पितुस्तुल्यं कृतं राज्यं शमवर्ती तु तत्सुतः । पितुस्तुल्यं कृतं राज्यं श्राद्धदेवस्तु तत्सुतः ॥२५
पितुस्तुल्यं कृतं राज्यं तस्माद्वै पितृवर्द्धनः । पितुस्तुल्यं कृतं राज्यं सोमदत्तस्तु तत्सुतः ॥२६
पितुस्तुल्यं कृतं राज्यं सौमदत्तिस्तदात्मजः । पितुस्तुल्यं कृतं राज्यं तस्माद्वै सोमवर्द्धनः ॥२७
पितुस्तुल्यं कृतं राज्यमवतंसः सुतस्ततः । पितुस्तुल्यं कृतं राज्यं प्रतंसस्तनयस्ततः ॥२८
पितुस्तुल्यं कृतं राज्यं परातंसस्तदात्मजः । पितुस्तुल्यं कृतं राज्यमयतंसस्ततोऽभवत् ॥२९
पितुस्तुल्यं कृतं राज्यं समातंसस्तु तत्सुतः । पितुस्तुल्यं कृतं राज्यमनुतंसस्तदात्मजः ॥३०
पितुस्तुल्यं कृतं राज्यमधितंसस्ततोऽभवत् । पितुस्तुल्यं कृतं राज्यमभितंसस्तदात्मजः ॥३१
पितुस्तुल्यं कृतं राज्यं समुत्तंसस्ततोऽभवत् । पितुस्तल्यं कृतं राज्यं तंसोनाम सुतोऽभवत् ॥३२
पितुस्तुल्यं कृतं राज्यं दुष्यन्तस्तनयस्ततः । शकुन्तलायां तस्माच्च भरतोनाम भूपतिः ॥३३
पितुस्तुल्यं कृतं राज्यं दुष्यन्तः स्वर्गतिं गतः । भरतोनाम तत्पुत्रो देवपूजनतत्परः ॥३४
महामायाप्रभावेन षट्त्रिंशद्वर्षजीवनम् । षट्त्रिंशब्दसहस्राणि नृपायुर्वर्द्धितं तथा ॥३५
तस्य नाम्ना स्मृतः खण्डो भारतो नाम विश्रुतः । तेन भूमेर्विभागश्च कृतं राज्यं पृथक् चिरम् ॥३६

---

और ब्रह्मभक्त के ब्रह्मोष्टिवर्द्धन, हुए, इनमें राजा वेद प्रवर्धन और ब्रह्मोष्टिवर्द्धन ने ...

दिव्यं वर्षशतं राज्यं तस्माज्जातो महाबलः । दिव्यं वर्षशतं राज्यं भरद्वाजस्ततोऽभवत् ॥३७
दिव्यं वर्षशतं राज्यं तस्माद्भवनमन्युमान् । अष्टादशसहस्राणि समा राज्यं प्रकीर्तितम् ॥३८
बृहत्क्षेत्रस्ततो ह्यासीत्पितुस्तुल्यं कृतं पदम् । सुहोत्रस्तनयस्तस्य पितुस्तुल्यं कृतं पदम् ॥३९
वीतिहोत्रस्तस्य सुतो राज्यं दशसहस्रकम् । यज्ञहोत्रस्ततोऽप्यासीत्पितुस्तुल्यं कृतं पदम् ॥४०
शक्रहोत्रस्ततो जातः पितुस्तुल्यं कृतं पदम् । प्रसन्नो भगवानिन्द्रस्तं नृपं स्वर्गमाप्तवान् ॥४१
तदायोध्यापतिः श्रीमान्प्रतापेन्द्रो महाबलः । भारतं वर्षमदधद्वर्षं दशसहस्रकम् ॥४२
मण्डलीकस्तस्य सुतः पितुस्तुल्यं कृतं पदम् । विजयेन्द्रस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥४३
धनुर्दीप्तस्तस्य सुतः पितुस्तुल्यं कृतं पदम् । इन्द्राज्ञया शक्रहोत्रो घृताच्या सह भूतले ॥४४
प्राप्तवान्सधनुर्दीप्तं जित्वा राज्यमचीकरत् । हस्तीनाम सुतो जात ऐरावतसुतं गजम् ॥४५
आरुह्य पश्चिमे देशे हस्तिनानगरी कृता । दशयोजनविस्तीर्णा स्वर्गगायास्तटे शुभा ॥४६
राज्यं दशसहस्रं च तत्र वासं चकार सः । तत्पुत्रस्त्वजमीढाख्यः पितुस्तुल्यं कृतं पदम् ॥४७
तस्माज्जातो रक्षपालः पितुस्तुल्यं कृतं पदम् । सुशम्यर्णस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥४८
तस्य पुत्रः कुरुर्नाम पितुरर्द्धं कृतं पदम् । इन्द्रस्य वरदानेन सदेहः स्वर्गमागतः ॥४९
तदा सात्त्वतवंशेऽस्मिन्वृष्णिर्नाम महाबलः । मथुरायां स्थितो राज्यं सर्वं स्ववशमाप्तवान् ॥५०
भगवतो वरदानेन हरेरद्भुतकर्मणः । पञ्चवर्षसहस्रं च सर्वं राज्यं वशीकृतम् ॥५१

---

राज्य पृथक् स्थापित कर उसका उपभोग किया था । इनका राजकाल दिव्य वर्ष से सौ वर्ष का बताया जाता है । पुनः इनके भरद्वाज और भरद्वाज के भवन मन्युमान् हुए, इन सभी का राजकाल भरत के समान ही कहा गया है । अठारह सहस्र वर्ष राज्य करने के उपरांत इनके बृहत्क्षेत्र नामक पुत्र हुआ तथा बृहत्क्षेत्र के सुहोत्र, सुहोत्र के वीतिहोत्र, वीतिहोत्र के यज्ञहोत्र और यज्ञहोत्र के शक्रहोत्र हुए जिन्हें प्रसन्न

निरावृत्तिस्तस्य सुतः पितुस्तुल्यं कृतं पदम् । दशारी तस्य तनयः पितुस्तुल्यं कृतं पदम् ॥५२
वियामुनस्तस्य सुतः पितुस्तुल्यं कृतं पदम् । जीमूतस्तस्य तनयः पितुस्तुल्यं कृतं पदम् ॥५३
विकृतिस्तस्य तनयः पितुस्तुल्यं कृतं पदम् । तस्माज्जातो भीमरथः पितुस्तुल्यं कृतं पदम् ॥५४
तस्माज्जातो नवरथः पितुस्तुल्यं कृतं पदम् । तस्माज्जातो दशरथः पितुस्तुल्यं कृतं पदम् ॥५५
तस्माज्जातश्च शकुनिः पितुस्तुल्यं कृतं पदम् । तस्माज्जातः कुशुम्भश्च पितुस्तुल्यं कृतं पदम् ॥५६
तस्माज्जातो देवरथः पितुस्तुल्यं कृतं पदम् । देवक्षेत्रस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥५७
तस्य पुत्रो मधुर्नाम पितुस्तुल्यं कृतं पदम् । ततो नवरथः पुत्रः पितुस्तुल्यं कृतं पदम् ॥५८
कुरुवत्सस्तस्य सुतः पितुस्तुल्यं कृतं पदम् । तस्मादनुरथः पुत्रः पितुस्तुल्यं कृतं पदम् ॥५९
पुरुहोत्रः सुतस्तस्य पितुस्तुल्यं कृतं पदम् । विचित्राङ्गस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥६०
तस्मात्सात्वतवान्पुत्रः पितुस्तुल्यं कृतं पदम् । भजमानस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥६१
विदूरथस्तस्य सुतः पितुस्तुल्यं कृतं पदम् । सुरभक्तस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥६२
तस्माच्च सुमनाः पुत्रः पितुस्तुल्यं कृतं पदम् । ततिक्षेत्रस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥६३
स्वायम्भुवस्तस्य सुतः पितुस्तुल्यं कृतं पदम् । हरिदीपक एवासौ तस्य राज्यं पितुस्समम् ॥६४
देवमेधास्सुतस्तस्य पितुस्तुल्यं कृतं पदम् । सुरपालस्तदा जातः पितुस्तुल्यं कृतं पदम् ॥६५
शक्राज्ञया कुरुश्चैव द्वापरत्रितये पदे । व्यतीते च सुकेश्यास्स स्वर्वेश्यायाः पतिः प्रभुः ॥६६
आगतो भारते खण्डे कुरुक्षेत्रं तदा कृतम् । विंशद्योजनविस्तीर्णं पुण्यक्षेत्रं स्मृतं बुधैः ॥६७
द्वादशाब्दसहस्रं च कुरुणा राज्यसात्कृतम् । तस्माज्जह्नुस्सुतो जातः पितुस्तुल्यं कृतं पदम् ॥६८
तस्माच्च सुरथो जातः पितुस्तुल्यं कृतं पदम् । विदूरथस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥६९
सार्वभौमस्तस्य सुतः पितुस्तुल्यं कृतं पदम् । जयसेनस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥७०

तस्मादर्णव एवासौ पितुस्तुल्यं कृतं पदम् । चतुस्सागरगामी च पितुस्तुल्यं कृतं पदम् ॥७१
अयुतायुस्तस्य सुतो राज्यं दशसहस्रकम् । अक्रोधनस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥७२
तस्मादृक्षस्सुतो जातः पितुस्तुल्यं कृतं पदम् । भीमसेनस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥७३
दिलीपस्तस्य तनयः पितुस्तुल्यं कृतं पदम् । प्रतीपस्तस्य तनयो राज्यं पञ्चसहस्रकम् ॥७४
शन्तनुस्तस्य पुत्रश्च राज्यमेकसहस्रकम् । विचित्रवीर्यस्तत्पुत्रो राज्यं वै द्विशतं समाः ॥७५
पाण्डुश्च तनयो यस्मिन्राज्यं पञ्चशतं कृतम् । युधिष्ठिरस्तस्य सुतो राज्यं पञ्चाशदब्दकम् ॥७६
सुयोधनेन षष्ट्यब्दं कृतं राज्यं ततः परम् । युधिष्ठिरेण निधनं तस्य प्राप्तं कुरुस्थले ॥७७
पूर्वं देवासुरे युद्धे ये दैत्याश्च सुरैर्हताः । ते सर्वे शन्तनो राज्ये जन्मवन्तः प्रतस्थिरे ॥७८
लक्षमक्षौहिणी तेषां तद्भारेण वसुन्धरा । शक्रस्य शरणं प्राप्तावतारं च ततो हरेः ॥७९
स सौरेर्वसुदेवस्य देवक्यां जन्मनाविशत् । एवं कृष्णो महावीर्यो रोहिणीनिलयं गतः ॥८०
पञ्चत्रिंशदुत्तरं च शतं वर्षं च भूतले । उषित्वा कृष्णचन्द्रश्च ततो गोलोकमागतः ॥८१
चतुर्थचरणान्ते च हरेर्जन्म स्मृतं बुधैः । हस्तिनापुरमध्यस्याभिमन्योस्तनयस्ततः ॥८२
राज्यमेकसहस्रं च ततोऽभूज्जनमेजयः । त्रिसहस्रं कृतं राज्यं शतानीकस्ततोऽभवत् ॥८३
पितुस्तुल्यं कृतं राज्यं यज्ञदत्तस्ततः सुतः । राज्यं पञ्चसहस्रं च निश्चक्रस्तनयोऽभवत् ॥८४

---

समान काल तक राज्य पर प्रतिष्ठित रहे । तथा अर्णव के अयुतायु पुत्र हुए, जिन्होंने दशसहस्र वर्ष तक राज्य का उपभोग किया था । पुनः अयुतायु के अक्रोधन, अक्रोधन के ऋक्ष, ऋक्ष के भीमसेन, भीमसेन के दिलीप, और दिलीप के प्रतीप उत्पन्न हुए जिन्होंने पाँच सहस्र वर्ष तक राज्य किया था, तथा शेष राजा

सहस्रमेकं राज्यं तदुष्ट्रपालस्ततोऽभवत् । पितुस्तुल्यं कृतं राज्यं तस्माच्चित्ररथस्सुतः ॥८५
पितुस्तुल्यं कृतं राज्यं धृतिमांस्तनयस्ततः । पितुस्तुल्यं कृतं राज्यं सुषेणस्तनयोऽभवत् ॥८६
पितुस्तुल्यं कृतं राज्यं सुनीथस्तनयोऽभवत् । पितुस्तुल्यं कृतं राज्यं मखपालः सुतोऽभवत् ॥८७
पितुस्तुल्यं कृतं राज्यं न चक्षुस्तनयस्ततः । पितुस्तुल्यं कृतं राज्यं सुखवन्तस्ततोऽभवत् ॥८८
पितुस्तुल्यं कृतं राज्यं तस्मात्पारिप्लवस्सुतः । पितुस्तुल्यं कृतं राज्यं सुनयस्तत्सुतोऽभवत् ॥८९
पितुस्तुल्यं कृतं राज्यं मेधावी तत्सुतोऽभवत् । पितुस्तुल्यं कृतं राज्यं तस्माज्जातो नृपञ्जयः ॥९०
पितुस्तुल्यं कृतं राज्यं मृदुस्तत्तनयोऽभवत् । पितुस्तुल्यं कृतं राज्यं तिग्मज्योतिस्तु तत्सुतः ॥९१
पितुस्तुल्यं कृतं राज्यं तस्माज्जातो बृहद्रथः । पितुस्तुल्यं कृतं राज्यं वसुदानस्ततोऽभवत् ॥९२
पितुस्तुल्यं कृतं राज्यं शतानीकस्ततोऽभवत् । पितुस्तुल्यं कृतं राज्यं तस्मादुद्यान उच्यते ॥९३
पितुस्तुल्यं कृतं राज्यं तस्माज्जातो ह्यहीनरः । पितुस्तुल्यं कृतं राज्यं निर्मित्रस्तनयोऽभवत् ॥९४
पितुस्तुल्यं कृतं राज्यं क्षेमकस्तत्सुतोऽभवत् । राज्यं त्यक्त्वा स मेधावी कलापग्राममाश्रितः ॥९५
म्लेच्छैश्च मरणं प्राप्तो यमलोकमतो गतः । नारदस्योपदेशेन प्रद्योतस्तनयस्ततः ॥९६
म्लेच्छयज्ञः कृतस्तेन म्लेच्छा हननमागताः ॥९७

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये
द्वापरनृपोपाख्यानं नाम तृतीयोऽध्यायः ।३

# चतुर्थोऽध्यायः

## द्वापरयुगभूपाख्यानवर्णनम्

### शौनक उवाच

कथं यज्ञः कृतस्तेन प्रद्योतेन विचक्षण । सर्वं कथय मे तात त्रिकालज्ञ महामुने ॥१

### सूत उवाच

एकदा हस्तिनगरे प्रद्योतः क्षेमकात्मजः । आस्थितः स कथामध्ये नारदोऽभ्यागमत्तदा ॥२
तं दृष्ट्वा हर्षितो राजा पूजयामास धर्मवित् । सुखोपविष्टः स मुनिः प्रद्योतं नृपमब्रवीत् ॥३
म्लेच्छैर्हतस्तव पिता यमलोकमतो गतः । म्लेच्छयज्ञप्रभावेण स्वर्गतिर्भविता हि सः ॥४
तच्छ्रुत्वा क्रोधताम्राक्षो ब्राह्मणान्वेदवित्तमान् । आहूय स कुरुक्षेत्रे म्लेच्छयज्ञं समारभत् ॥५
यज्ञकुण्डं चतुष्कोणं योजनान्येव षोडश । रचित्वा देवतां ध्यात्वा म्लेच्छांश्च जुहुयान्नृपः ॥६
हारहूणान्बर्बरांश्च गुरुण्डांश्च शकान्खसान् । यवनान्पल्लवांश्चैव रोमजान्खरसम्भवान् ॥७
द्वीपस्थितान्कामरूश्च चीनान्सागरमध्यगान् । प्राहूय भस्मसात्कुर्वन्वेदमन्त्रप्रभावतः ॥८
ब्राह्मणान्दक्षिणां दत्त्वा अभिषेकमकारयत् । क्षेमको नाम नृपतिः स्वर्गलोकं ततो गतः ॥९

---

# अध्याय ४

## द्वापर के राजाओं का वर्णन

म्लेच्छहन्ता नाम तस्य विख्यातं भुवि सर्वतः । राज्यं दशसहस्राब्दं कृतं तेन महात्मना ।।१०
स्वर्गलोकं गतो राजा तत्पुत्रो वेदवान्स्मृतः । द्विसहस्रं कृतं राज्यं तदा म्लेच्छः कलिः स्वयम् ।।
नारायणं पूजयित्वा दिव्यस्तुतिमथाकरोत् ।।११

## कलिरुवाच

नमोऽनन्ताय महते सर्वकालप्रवर्तिने ।।१२
चतुर्युगकृते तुभ्यं वासुदेवाय साक्षिणे । दशावताराय हरे नमस्तुभ्यं नमोनमः ।।१३
नमः शक्त्यावताराय रामकृष्णाय ते नमः । नमो मत्स्यावताराय महते गौरवासिने ।।१४
नमो भक्तावताराय कल्पक्षेत्रनिवासिने । राज्ञा वेदवता नाथ मम स्थानं विनाशितम् ।।
मम प्रियस्य म्लेच्छस्य तत्पित्रा वंशनाशनम् ।।१५

## सूत उवाच

इति स्तुतस्तु कलिना म्लेच्छस्य सह भार्यया ।।१६
प्राप्तवान्स हरिः साक्षाद्भगवान्भक्तवत्सलः । कलिं प्रोवाच स हरिर्युष्मदर्थे युगोत्तमम् ।।१७
बहुरूपमहं कृत्वा तवेच्छां पूरयाम्यहम् । आदमो नाम पुरुषः पत्नी हव्यवती तथा ।।१८
विष्णुकर्दमतो जातौ म्लेच्छवंशप्रवर्धनौ । हरिस्त्वन्तर्दधे तत्र कलिरानन्दसङ्कुलः ।।१९
गिरिं नीलाचलं प्राप्य किञ्चित्कालमवासयत् । पुत्रो वेदवतो जातः सुनन्दो नाम भूपतिः ।।२०
पितुस्तुल्यं कृतं राज्यमनपत्यो मृतिं गतः । आर्यदेशाः क्षीणवन्तो म्लेच्छवंशं बलान्विताः ।।२१

---

दिन से राजा प्रद्योत का नाम इस भूमण्डल में चारो ओर 'म्लेच्छहंता' विख्यात हुआ । दशसहस्र वर्ष राज्य करने के उपरांत उस महात्मा राजा ने स्वर्गलोक को प्रस्थान किया । तदनन्तर उनके पुत्र वेदवान

भविष्यन्ति भृगुश्रेष्ठ तस्माच्च तुहिनाचलम् । गत्वा विष्णुं समाराध्य गमिष्यामो हरेः पदम् ॥२२
इति श्रुत्वा द्विजाः सर्वे नैमिषारण्यवासिनः । अष्टाशीतिसहस्राणि गतास्ते तुहिनाचलम् ॥२३
विशालायां समासाद्य विष्णुगाथां प्रचक्षिरे । इति व्यासेन कथितं वाक्यं कलिविशारदम् ॥
श्रोतारं स मनः कृत्वा भविष्यं समुदीरयत् ॥२४

## व्यास उवाच

मनः शृणु ततो गाथां भावीं सूतेन वर्णिताम् । कलेर्युगस्य पूर्णां तां तच्छ्रुत्वा तृप्तिमाह्व ॥२५

## सूत उवाच

षोडशाब्दसहस्रे च शेषे तद्द्वापरे युगे । बहुकीर्तिमती भूमिरार्यदेशस्य कीर्तिता ॥२६
क्वचिद्विप्राः स्मृता भूपाः क्वचिद्राजन्यवंशजाः । क्वचिच्छूद्राः क्वचिद्विप्राः कुत्रचिद्वर्णसङ्कराः ॥२७
द्विशताष्टसहस्रे द्वे शेषे तु द्वापरे युगे । म्लेच्छदेशस्य या भूमिर्भविता कीर्तिमालिनी ॥२८
इन्द्रियाणि दमित्वा यो ह्यात्मध्यानपरायणः । तस्मादादमनामासौ पत्नी हव्यवती स्मृता ॥२९
प्रदाननगरस्यैव पूर्वभागे महावनम् । ईश्वरेण कृतं रम्यं चतुःक्रोशायतं स्मृतम् ॥३०
पापवृक्षतले गत्वा पत्नीदर्शनतत्परः । कलिस्तत्रागतस्तूर्णं सर्परूपं हि तत्कृतम् ॥३१
वञ्चिता तेन धूर्तेन विष्णवाज्ञा भङ्गतां गता । खादित्वा तत्फलं रम्यं लोकमार्गप्रदं पतिः ॥३२

---

हुआ । तत्पश्चात् नैमिषारण्य निवासी समस्त द्विज वृन्द 'भृगुश्रेष्ठ ! यह आर्य देश क्रमशः क्षीण होगा और म्लेच्छवंश के लोग सबल होंगे इसलिए हमलोग हिमालय पर्वत पर चलकर भगवान् विष्णु की आराधना करके उनके लोक की प्राप्ति करेंगे, इस प्रकार की बातें सुनकर अट्ठासी सहस्र की संख्या में वे लोग हिमालय की यात्रा के लिए अग्रसर हुए । विशाला में पहुँच कर उन लोगों ने विष्णु-गाथा का प्रचार

उदुम्बरस्य पत्रैश्च ताभ्यां वाय्वशनं कृतम् । सुताः पुत्रास्ततो जाताः सर्वे म्लेच्छा बभूविरे ॥३३
त्रिंशोत्तरं नवशतं तस्यायुः परिकीर्तितम् । फलानां हवनं कुर्वन्पत्न्या सहदिवं गतः ॥३४
तस्माज्जातः सुतः श्रेष्ठः श्वेतनामेति विश्रुतः । द्वादशोत्तरवर्षं च तस्यायुः परिकीर्तितम् ॥३५
अनुहस्तस्य तनयः शत हीनं कृतं पदम् । कीनाशस्तस्य तनयः पितामहसमं पदम् ॥३६
महल्ललस्तस्य सुतः पञ्चहीनं शतं नव । तेन राज्यं कृतं तत्र तस्मान्मानगरं स्मृतम् ॥३७
तस्माच्च विरदो जातो राज्यं षष्ट्युत्तरं समाः । ज्ञेयं नवशतं तस्य स्वनाम्ना नगरं कृतम् ॥३८
हनूकस्तस्य तनयो विष्णुभक्तिपरायणः । फलानां हवनं कुर्वन्तस्त्वं ह्यसि जयन्सदा ॥३९
त्रिशतं पञ्चषष्टिश्च राज्यं वर्षाणि तत्स्मृतम् । सन्देहः स्वर्गमायातो म्लेच्छधर्मपरायणः ॥४०
आचारश्च विवेकश्च द्विजता देवपूजनम् । कृतान्येतानि तेनैव तस्मान्म्लेच्छः स्मृतो बुधैः ॥४१
विष्णुभक्त्याग्निपूजा च ह्यहिंसा च तपो दमः । धर्माण्येतानि मुनिभिर्म्लेच्छानां हि स्मृतानि वै ॥४२
मतोच्छिलस्तस्य सुतो हनुकस्यैव भार्गव । राज्यं नवशतं तस्य सप्ततिश्च स्मृताः समाः ॥४३
लोमकस्तस्य तनयो राज्यं सप्तशतं समाः । सप्तसप्ततिरेवास्य तत्पश्चात्स्वर्गतिं गतः ॥४४
तस्माज्जातः सुतो न्यूहो निर्गतस्तूह एव सः । तस्मान्न्यूहः स्मृतः प्राज्ञै राज्यं पञ्चशतं कृतम् ॥४५
सीमः शमश्च भावश्च त्रयः पुत्राः बभूविरे । न्यूहः स्मृतो विष्णुभक्तस्सोऽहं ध्यानपरायणः ॥४६
एकदा भगवान्विष्णुस्तत्स्वप्ने तु समागतः ॥४७
वत्स न्यूह शृणुष्वेदं प्रलयः सप्तमेऽहनि । भविता त्वं जनैस्सार्धं नावमारुह्य सत्वरम् ॥४८

---

संतान उत्पन्न हुई सभी म्लेच्छ हुए । नव सौ तीस वर्ष उनकी आयु बतायी गयी है । फलों के हवन करते हुए पत्नी समेत उनके स्वर्गीय होने पर उनके श्वेत नामक पुत्र रत्न उत्पन्न हुआ । जिसकी एक सौ बारह वर्ष की आयु कही गयी है ।

जीवनं कुरु भक्तेन्द्र सर्वश्रेष्ठो भविष्यसि । तथेति मत्वा स मुनिर्नावं कृत्वा सुपुष्टिताम् ।।४९
हस्तत्रिशतलम्बां च पञ्चाशद्धस्तविस्तृताम् । त्रिंशद्धस्तोच्छ्रितां रम्यां सर्वजीवसमन्विताम् ।।५०
आरुह्य स्वकुलैस्सार्द्धं विष्णुध्यानपरोऽभवत् । सांवर्तको मेघगणो महेन्द्रेण समन्वितः ।।५१
चत्वारिंशद्दिनान्येव महावृष्टिमकारयत् । सर्वं तु भारतं वर्षं जलैः प्लाव्य तु सिन्धवः ।।५२
चत्वारो मिलिताः सर्वे विशालायां न चागताः । अष्टाशीतिसहस्राणि मुनयो ब्रह्मवादिनः ।।५३
न्यूहश्च स्वकुलैस्सार्धं शेषास्सर्वे विनाशिताः । तदा च मुनयस्सर्वे विष्णुमायां प्रतुष्टुवुः ।।५४

## मुनय ऊचुः

नमो देव्यै महाकाल्यै देवक्यै च नमो नमः । महालक्ष्म्यै विष्णुमात्रे राधा देव्यै नमो नमः ।।५५
रेवत्यै पुष्पवत्यै च स्वर्णवत्यै नमो नमः । कामाक्षायै च मायायै नमो मात्रे नमो नमः ।।५६
महावातप्रभावेन महामेघरवेण च । जलधाराभिरुग्राभिर्भयं जातं हि दारुणम् ।।५७
तस्माद्भयाद्भैरवि त्वमस्मान्संरक्ष किङ्करान् । तदा प्रसन्ना सा देवी जलं शान्तं तया कृतम् ।।५८
अब्दान्तरे मही सर्वा स्थली भूत्वा प्रदृश्यते । आराच्च शिषिणा नाम हिमाद्रेस्तटभूमयः ।।५९
न्यूहस्तत्र स्थितो नावमारुह्य स्वकुलैस्सह । जलान्ते भूमिमागत्य तत्र वासं करोति सः ।।६०

**इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चर्तुयुगखण्डापरपर्यायि द्वापरनृपोपाख्यानं नाम चतुर्थोऽध्यायः ।४**

---

समेत शीघ्र नाव पर बैठकर अपने जीवन की रक्षा करना' भक्तेन्द्र ! इससे तुम सभी भक्तों में श्रेष्ठ कहलाओगे । भगवान् की आज्ञा शिरोधार्य कर एक सुदृढ़ नाव पर जो तीन सौ हाथ की लम्बी, पचास हाथ की चौड़ी, और तीस हाथ की ऊँची थी, अपने कुल समेत समस्त जीवों को उस पर बैठाकर स्वयं

# अथ पञ्चमोऽध्यायः

## कलियुगभूपाख्यानवर्णनम्

### शौनक उवाच

साम्प्रतं वर्तते यो वै प्रलयान्ते मुनीश्वर। द्विव्यदृष्टिप्रभावेन ज्ञातं ब्रूहि ततःपरम् ॥१

### सूत उवाच

न्यूहो नाम स्मृतो म्लेच्छो विष्णुमोहं तदाकरोत्। तदा प्रसन्नो भगवांस्तस्य वंशः प्रवर्द्धितः ॥२
म्लेच्छभाषा कृता तेन वेदवाक्यपराङ्मुखा। कलेश्च वृद्धये ब्राह्मीं भाषां कृत्वाऽपशब्दगाम् ॥३
न्यूहाय दत्तवान्देवो बुद्धीशो बुद्धिगः स्वयम्। विलोमं च कृतं नाम न्यूहेन त्रिसुतस्य वै ॥४
सिमश्च हामश्च तथा याकूतो नाम विश्रुतः। याकूतः सप्तपुत्रश्च जुम्रो माजूज एव सः ॥५
मादी तथा च यूनानस्तूवलोमसकस्तथा। तीरासश्च तथा तेषां नामभिर्देश उच्यते ॥६
जुम्रा दश कनाब्जश्व रिफतश्च तजर्रमः। तन्नाम्ना च स्मृता देशा यूनाद्या ये सुताः स्मृताः ॥७
इलीशस्तरलीशश्च कित्तीहूदानिरुच्यते। चतुर्भिर्नामभिर्देशास्तेषां तेषां प्रचक्रिरे ॥८
द्वितीयतनयाद्धामात्सुताश्चत्वार एव ते। कुशो मिश्रश्च कूजश्च कनआंस्तत्र नामभिः ॥९
देशाः प्रसिद्धा म्लेच्छानां कुशात्षट्तनयाः स्मृताः। स वा चैव हबीलश्च सर्वतोरगमस्तथा ॥१०
तथा सवतिका नाम निमरूहो महाबलः। तेषां पुत्राश्च कलनः सिनारोरक उच्यते ॥११

---

# अध्याय ५

## कलियुग के राजाओं का वर्णन

**अक्कदो बावुनश्चैव रसनादेशकाश्च ते । श्रावयित्वा मुनीन्सूतो योगनिद्रावशं गतः ॥१२**
**द्विसहस्रे शताब्दान्ते बुद्धा पुनरथाब्रवीत् । सिमवंशं प्रवक्ष्यामि सिमो ज्येष्ठः स भूपतिः ॥१३**
**राज्यं पञ्चशतं वर्षं तेन म्लेच्छेन सत्कृतम् । अर्कन्सदस्तस्य सुतश्चतुस्त्रिंशच्च राज्यकम् ॥१४**
**चतुश्शतं पुनर्ज्ञेयं सिह्लस्तत्तनयोऽभवत् । राज्यं तस्य स्मृतं तत्र षष्ट्युत्तरचतुःशतम् ॥१५**
**इव्रतस्य सुतो ज्ञेयः पितुस्तुल्यं कृतं पदम् । फलजस्तस्य तनयश्चत्वारिंशद्द्वयं शतम् ॥१६**
**राज्यं कृतं तु तस्माच्च रऊ नाम सुतः स्मृतः । सप्तत्रिंशच्च द्विशतं तस्य राज्यं प्रकीर्तितम् ॥१७**
**तस्माच्च जूज उत्पन्नः पितुस्तुल्यं कृतं पदम् । नहूरस्तस्य तनयो वयः षष्ट्युत्तरं शतम् ॥**
**राज्यं चकार नृपतिर्बहुशत्रून्विहिंसयन् ॥१८**
**ताहरस्तस्य तनयः पितुस्तुल्यं कृतं पदम् । तस्मात्पुत्रोऽविरामश्च नहूरो हारनस्त्रयः ॥१९**
**एवं तेषां स्मृता वंशा नाममात्रेण कीर्तिताः । सरस्वत्याश्च शापेन म्लेच्छभाषा महाधमाः ॥२०**
**तेषां वृद्धिः कलौ चासीत्संक्षेपेण प्रकीर्तिता । संस्कृतस्यैव वाणी तु भारतं वर्षमूह्यताम् ॥२१**
**अन्यखण्डे गता सैव म्लेच्छा ह्यानन्दिनोऽभवन् । एवं ते विप्र कथितं विष्णुभक्तद्विजैस्सह ॥२२**

## व्यास उवाच

**तच्छ्रुत्वा मुनयस्सर्वे विशालायां निवासिनः । नरं नारायणं देवं सम्पूज्य विनयान्विताः ॥२३**

---

रसना देशक आदि पुत्र बताये गये हैं। इतनी बातों को मुनियों को सुनाकर सूत अपनी योगनिद्रा में निमग्न हो गये ।४-१२। दो सहस्र आठ सौ वर्ष के व्यतीत होने पर बुद्ध ने पुनः कहा कि मैं सिमवंश का वर्णन करूंगा, जिस कुल में सिम नामक सर्वप्रथम राजा हुआ था। उस म्लेच्छ राजा ने पाँच सौ वर्ष तक राज्य का उपभोग किया था, पश्चात् उसके 'अर्कन्सद' नामक पुत्र हुआ, जो चार सौ चौंतीस वर्ष तक

ध्यानं चक्रुर्मुदा युक्ता द्विशतं परिवत्सरान् । तत्पश्चाद्बोधितास्सर्वे शौनकाद्या मुनीश्वराः ॥२४
सन्ध्यातर्पणदेवार्चाः कृत्वा ध्यात्वा जनार्दनम् । लोमहर्षणमासीनं पप्रच्छुर्विनयान्विताः ॥२५
व्यासशिष्य महाभाग चिरं जीव महामते । साम्प्रतं वर्तते यो वै राजा तन्मे वद प्रभो ॥२६

## सूत उवाच

त्रिसहस्राब्दसम्प्राप्ते कलौ भार्गवनन्दन । आवन्ते शङ्खनामाऽसौ साम्प्रतं वर्तते नृपः ॥२७
म्लेच्छदेशे शकपतिरथ राज्यं करोति वै । शृणु तत्कारणं सर्वे यथा यस्य विवर्धनम् ॥२८
द्विसहस्रे कलौ प्राप्ते म्लेच्छवंशविवर्द्धिता । भूमिर्म्लेच्छमयी सर्वा नानापथविवर्द्धिता ॥२९
ब्रह्मावर्तमृते तत्र सरस्वत्यास्तटं शुभम् । म्लेच्छाचार्यश्च मूशाख्यस्तन्मतैः पूरितं जगत् ॥३०
देवार्चनं वेदभाषा नष्टा प्राप्ते कलौ युगे । तल्लक्षणं शृणु मुने म्लेच्छभाषाश्चतुर्विधाः ॥३१
व्रजभाषा महाराष्ट्री यावनी च गुरुण्डिका । तासां चतुर्लक्षविधा भाषाश्चान्यास्तथैव च ॥३२
पानीयं च स्मृतं पानी बुभुक्षा भूख उच्यते । पानीयं पापड़ीभाषा भोजनं कक्कनं स्मृतम् ॥३३
इष्टिशुद्धरवः प्रोक्त इस्तिनी मसपावनी । आहुतिर्वै आजु इति ददाति च दधाति च ॥३४
पितृपैतरभ्राता च बादरः पतिरेव च । सेति सा यावनी भाषा ह्यश्वश्चास्पस्तथापुनः ॥३५
जानुस्थाने जैनुशब्दः सप्तसिन्धुस्तथैव च । सप्तहिन्दुर्यावनी च पुनर्ज्ञेया गुरुण्डिका ॥३६
रविवारे च सण्डे च फाल्गुने चैव फर्वरी । षष्टिश्च सिक्सटी ज्ञेया तदुदाहारमीदृशम् ॥३७

---

मुनीश्वरों ने ज्ञान प्राप्त कर संध्या, तर्पण एवं देवों की पूजा करने के उपरांत जनार्दन भगवान् का ध्यान करके आसनासीन लोमहर्षण से नम्रतापूर्वक प्रश्न किया । व्यासशिष्य, महाभाग एवं हे महामते ! आप दीर्घजीवी हों । हे प्रभो ! आधुनिक समय में जो राजा राज्य का उपभोग कर रहा है, उसका वर्णन करने की कृपा कीजिए ।२३-२६

या पवित्रा सप्तपुरी तासु हिंसा प्रवर्तते । दस्यव: शबरा भिल्ला मूर्खा आर्ये स्थिता नरा: ॥३८
म्लेच्छदेशे बुद्धिमन्तो नरा वै म्लेच्छधर्मिण: । म्लेच्छाधीना गुणा: सर्वेऽवगुणा आर्यदेशके ॥३९
म्लेच्छराज्यं भारते च तद्द्वीपेषु स्मृतं तथा । एवं ज्ञात्वा मुनिश्रेष्ठ हरिं भज महामते ॥४०
तच्छ्रुत्वा मुनय: सर्वे रोदनं चक्रिरे बहु ॥४१

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगभूपवर्णनं नाम पञ्चमोऽध्याय: ।५

# अथ षष्ठोऽध्याय:

## कलियुगभूपाख्यानवर्णनम्

### शौनक उवाच

ब्रह्मावर्ते कथं म्लेच्छा न प्राप्ता: कारणं वद । सूत: प्राह श्रृणुष्वेदं सरस्वत्या: प्रभावत: ॥१
म्लेच्छा: प्राप्ता न तत्स्थाने काश्यपो नाम वै द्विज: । कलौ प्राप्ते सहस्राब्दे स्वर्गात्प्राप्त: सुराज्ञया ॥२
आर्यावती च तत्पत्नी दश पुत्रानकल्मषान् । काश्यपात्सा लब्धवती तेषां नामानि मे श्रृणु ।३
उपाध्यायो दीक्षितश्च पाठक: शुक्लमिश्रकौ । अग्निहोत्री द्विवेदी च त्रिवेदी पाण्ड्य एव च ॥४
चतुर्वेदीति कथिता नामतुल्यगुणा: स्मृता: । तेषां मध्ये काश्यपश्च सर्वज्ञानसमन्वित: ॥५

---

कहा गया है (भारत की) पवित्र सातों पुरी में हिंसा होती रहेगी, क्योंकि आर्य प्रदेश में दस्यु, शबर, भिल्ल और मूर्खों की स्थिति बनी रहेगी। म्लेच्छ देशों में बुद्धिमान् होते हुए मनुष्य म्लेच्छ धर्मी होगें क्योंकि सभी गुण म्लेच्छों के अधीन और समस्त अवगुण (दोष) आर्य प्रदेशों में बिखरे रहेंगे। भारतवर्ष एवं द्वीपान्तरों में म्लेच्छों का राज्य रहेगा, मुनिश्रेष्ठ! तथा महामते! ऐसा समझकर भगवान का भजन

**काश्मीरे प्राप्तवान्सोऽपि जगदम्बां सरस्वतीम् । तुष्टाव पूजनं कृत्वा रक्तपुष्पैस्तथाक्षतैः ।।६**
**धूपैर्दीपैश्च नैवेद्यैः पुष्पाञ्जलिसमन्वितः ।।७**

## काश्यप उवाच

**मातः शङ्करदयिते मयि ते करुणा कुतो नास्ति । भोऽसि[1] त्वं जगदम्बा जगतः किं मां बहिर्नयसि ।।८**
**देवि त्वं सुरहेतोर्धर्मद्रोहिणमाशु हंसि मातः । उत्तमसंस्कृतभाषां त्वं कुरु म्लेच्छांश्च मोहयेः शीघ्रम्।।९**
**अम्ब त्वं बहुरूपा हुङ्काराद्धूम्रलोचनं हंसि । भीमं दुर्गा दैत्यं हत्वा जगतां सुखं नयसि ।।१०**
**दम्भं मोहं घोरं गर्वं हत्वा सदा सुखं शेषे । बोधय मातर्जगतो दुष्टान्नष्टान्कुरु त्वं वै ।।**
**तदा प्रसन्ना सा देवी भो मुनेस्तस्य मानसे ।।११**
**वासं कृत्वा ददौ ज्ञानं मिश्रदेशे मुनिर्[illegible] । सर्वान्म्लेच्छान्मोहयित्वा कृत्वाथ तान्द्विजन्मनः ।।१२**
**संख्यादशसहस्रं च नरवृन्दं द्विजन्मनाम् । द्विसहस्रं स्मृता वैश्याः शेषाः शूद्रसुताः स्मृताः ।।१३**
**तैः सार्द्धमार्यदेशे स सरस्वत्याः प्रसादतः । अवसद्वै मुनिश्रेष्ठो मुनिकार्यरतः सदा ।।१४**
**तेषामार्यसमूहानां देव्याश्च वरदानतः । वृद्धिर्भवति बहुला चतुष्कोटिनराः स्त्रियः ।।१५**

---

हैं। उन लोकों में काश्यप सर्वज्ञानी थे। उन्होंने काश्मीर में जाकर रक्तवर्ण के पुष्पों और अक्षतों से जगदम्बा सरस्वती की पूजा की। धूप, दीप, तथा नैवेद्य अर्पित करने के उपरांत पुष्पाञ्जलि लेकर प्रार्थना करना आरम्भ किया।४-७

**काश्यप बोले**—मातः ! शंकरप्रिये ! मेरे लिये तुम्हें करुणा क्यों नहीं हो रही है ? आप जगत् की माता हैं, तो मुझे जगत् के बाहर क्यों निकाल रही हैं। हे देवि, मातः ! देवों के कार्य के लिए आप धर्मद्रोही का शीघ्र नाश करती हैं। उत्तम संस्कृत भाषा की ही प्रधानता रहे अतः म्लेच्छों को शीघ्र

तेषां पुत्राश्च पौत्राश्च तद्भूपः काश्यपो मुनिः । विंशोत्तरशतं वर्षं तस्य राज्यं प्रकीर्तितम् ॥१६
राज्यपुत्राख्यदेशे च शूद्राश्चाष्टसहस्रकाः । तेषां भूपश्चार्यपृथुस्तस्माज्जातस्स मागधः ॥१७
मागधं नाम तत्पुत्रमभिषिच्य ययौ मुनिः । इति श्रुत्वा भृगुश्रेष्ठः शौनको हर्षमागतः ॥१८
सूतं पौराणिकं नत्वा विष्णुध्यानपरोऽभवत् । पुनश्च श्रुतिवर्षान्ते बोधिता मुनयस्तथा ॥१९
नित्यनैमित्तिकं कृत्वा पप्रच्छुरिदमादरात् । लोमहर्षण मे ब्रूहि के राजानश्च मागधात् ॥
कलौ राज्यं कृतं यैस्तु व्यासशिष्य वदस्व नः ॥२०

## सूत उवाच

मागधो मागधे देशे प्राप्तवान्काश्यपात्मजः ॥२१
पितृराज्यं स्मृतं तेन त्वार्यदेशः पृथक्कृतः । पाञ्चालात्पूर्वतो देशो मागधः परिकीर्तितः ॥२२
आग्नेय्यां च कलिङ्गश्च तथावन्तस्तु दक्षिणे । आनर्तदेशो नैर्ऋत्यां सिन्धुदेशस्तु पश्चिमे ॥२३
वायव्यां कैकयो देशो मद्रदेशस्तथोत्तरे । ईशाने चैव कोणिन्दश्चार्यदेशश्च तत्कृतः ॥२४
देशनाम्ना तस्य सुता मगधस्य महात्मनः । तेभ्योंऽशानि प्रदत्तानि तत्पश्चात्क्रतुमुद्वहन् ॥२५
बलभद्रस्तदा तुष्टो यज्ञभावेन भावितः । शिशुनागः क्रतोर्जातो बलभद्रांशसम्भवः ॥२६
शतवर्षं कृतं राज्यं काकवर्मा सुतोऽभवत् । तद्राज्यं नवतिवर्षं क्षेमधर्मा ततोऽभवत् ॥२७
अशीतिवर्षं राज्यं तत्क्षेत्रौजास्ततसुतोऽभवत् । दशहीनं कृतं राज्यं वेदमिश्रस्ततोऽभवत् ॥२८

---

समय में भी काश्यप मुनि ही राजा थे। उन्होंने एक सौ बीस वर्ष राज्य किया। राजपुत्र के प्रदेश में आठ सहस्र शूद्र निवासी थे। उनका राजा आर्य पृथु था, जिसके मागध नामक पुत्र हुआ। उसी मागध राजकुमार का राज्याभिषेक करके मुनि ने प्रस्थान किया। इसे सुनकर भृगुश्रेष्ठ शौनक अत्यन्त हर्षित हुए। पौराणिक सूत जी को नमस्कार करके पुनः विष्णु का ध्यान करना आरम्भ किया। चार वर्ष के

दशहीनं कृतं राज्यं ततोऽजातरिपुस्सुतः । दशहीनं कृतं राज्यं दर्भकस्तनयोऽभवत् ॥२९
दशहीनं कृतं राज्यमुदयाश्वस्ततोऽभवत् । दशहीनं कृतं राज्यं नन्दवर्धन एव तत् ॥३०
दशहीनं कृतं राज्यं तस्मान्नन्दसुतोऽभवत् । पितुस्तुल्यं कृतं राज्यं शूद्रीगर्भसमुद्भवः ॥३१
नन्दाज्जातः प्रनन्दश्च दशवर्षं कृतं पदम् । तस्माज्जातः परानन्दः पितुस्तुल्यं कृतं पदम् ॥३२
तस्माज्जातस्समा नन्दो विंशद्वर्षं कृतं पदम् । तस्माज्जातः प्रियानन्दः पितुस्तुल्यं कृतं पदम् ॥३३
देवानन्दस्तस्य सुतः पितुस्तुल्यं कृतं पदम् । यज्ञभङ्गः सुतस्तस्मात्पितुरर्द्धं कृतं पदम् ॥३४
मौर्यानन्दस्तस्य सुतः पितुस्तुल्यं कृतं पदम् । महानन्दस्ततो जातः पितुस्तुल्यं कृतं पदम् ॥३५
एतस्मिन्नेव काले तु कलिना संस्मृतो हरिः । काश्यपादुद्भवो देवो गौतमो नाम विश्रुतः ॥३६
बौद्धधर्मं च संस्कृत्य पट्टणे प्राप्तवान्हरिः । दशवर्षं कृतं राज्यं तस्माच्छाक्यमुनिः स्मृतः ॥३७
विंशद्वर्षं कृतं राज्यं तस्माच्छुद्धोदनोऽभवत् । त्रिंशद्वर्षं कृतं राज्यं शाक्यसिंहस्ततोऽभवत् ॥३८
शताद्वौ द्विसहस्रेऽब्दे व्यतीते सोऽभवन्नृपः । कलेः प्रथमचरणे वेदमार्गो विनाशितः ॥३९
षष्टिवर्षं कृतं राज्यं सर्वबौद्धा नराः स्मृताः । नरेषु विष्णुर्नृपतिर्यथा राजा तथा प्रजाः ॥४०
विष्णोर्वीर्यानुसारेण जगद्धर्मः प्रवर्त्तते । तस्मिन्हरौ ये शरणं प्राप्ता मायापतौ नराः ॥४१
अपि पापसमाचारा मोक्षवन्तः प्रकीर्तिताः । शक्यासिंहाद्बुद्धसिंहः पितुरर्द्धं कृतं पदम् ॥४२

---

रिपु, अजातरिपु के दर्भक, दर्भक के उदयाश्व, उदयाश्व के नंदवर्धन, नंदवर्धन के नंद हुआ, जिसका जन्म ग्रहण करना किसी शूद्री के गर्भ से बताया जाता है, उसने अपने पिता के समान काल तक राज्य किया। उपरोक्त सभी राजवृन्द ने अपने पिता से उत्तरोत्तर दश वर्ष न्यून समय तक राज्य किये है। पुनः नन्द के प्रनन्द हुआ जिसने दश वर्ष तक राज्य किया। उसके परानन्द हुआ जिसने अपने पिता के समान काल तक राज्य किया। परानन्द के समानन्द हुआ उसने बीस वर्ष तक राज्य किया। ...

चन्द्रगुप्तस्तस्य सुतः पौरसाधिपतेःसुताम् । सुलूवस्य तथोद्वाह्य यावनीबौद्धतत्परः ।।४३
षष्टिवर्षं कृतं राज्यं बिन्दुसारस्ततोऽभवत् । पितृस्तुल्यं कृतं राज्यमशोकस्तनयोऽभवत् ।।४४
एतस्मिन्नेव काले तु कान्यकुब्जो द्विजोत्तमः । अर्बुदं शिखरं प्राप्य ब्रह्महोममथाकरोत् ।।४५
वेदमन्त्रप्रभावाच्च जाताश्चत्वारि क्षत्रियाः । प्रमरस्सामवेदी च चपहानिर्यजुर्विदः ।।४६
त्रिवेदी च तथा शुक्लोथर्वा स परिहारकः । ऐरावतकुले जातान्गजानारुह्यते पृथक् ।।४७
अशोकं स्ववशं चक्रुस्सर्वे बौद्धा विनाशिताः । चतुर्लक्षाः स्मृता बौद्धाः दिव्यशस्त्रैः प्रहारिताः ।।४८
अवन्ते प्रमरो भूपश्चतुर्योजनविस्तृताम् । अम्बावतीं नाम पुरीमध्यास्य सुखितोऽभवत् ।।४९

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये
कलियुगभूपवर्णनोपाख्यानं नाम षष्ठोध्यायः ।६

# अथ सप्तमोऽध्यायः

## शशिवंशभूपवर्णनम्

### सूत उवाच

चित्रकूटगिरेर्देशे परिहारो महीपतिः । कलिञ्जरपुरं रम्यमक्रोशायतनं स्मृतम् ।।१
अध्यास्य बौद्धहन्ता स सुखितोभवद्दूर्जितः । राजपुत्राख्यदेशे च चपहानिर्महीपतिः ।।२

---

चन्द्र गुप्त हुए, जिसने पौरसाधिपति की सुलूवस्य की पुत्री उस यवनी के साथ पाणिग्रहण करके उस बौद्ध ने पत्नी समेत साठ वर्ष तक राज्य किया। चन्द्रगुप्त के बिंदुसार हुआ उसने अपने पिता के समान काल तक राज्य किया। बिंदुसार के अशोक हुए। उसी समय में कोई ब्राह्मण श्रेष्ठ कान्यकुब्ज ने अर्बुद पर्वत

अजमेरपुरं रम्यं विधिशोभासमन्वितम् । चातुर्वर्ण्ययुतं दिव्यमध्यास्य सुखितोऽभवत् ॥३
शुक्लो नाम महीपालो गत आनर्तऽमण्डले । द्वारकां नाम नगरीमध्यास्य सुखितोऽभवत् ॥४

### शौनक उवाच

तेषामग्न्युद्भवानां च ये भूपा राज्यसत्कृताः । तान्मे ब्रूहि महाभाग सूतो वाक्यमथाब्रवीत् ॥५
गच्छध्वं ब्राह्मणाः सर्वे योगनिद्रावशो ह्यहम् । तच्छ्रुत्वा मुनयः सर्वे विष्णोर्ध्यानं प्रचक्रिरे ॥६
पूर्णे द्वे च सहस्रान्ते सूतो वचनमब्रवीत् । सप्तत्रिंशशते वर्षे दशाब्दे चाधिके कलौ ॥७
प्रमरो नाम भूपालः कृतं राज्यं च षट्समाः । महामदस्ततो जातः पितुरर्धं कृतं पदम् ॥८
देवापिस्तनयस्तस्य पितुस्तुल्यं कृतं पदम् । देवदूतस्तस्य सुतः पितुस्तुल्यं स्मृतं पदम् ॥९
तस्माद्गन्धर्वसेनश्च पञ्चाशदब्दभूपदम् । कृत्वा च स्वसुतं शङ्खमभिषिच्य वनं गतः ॥१०
शङ्खेन तत्पदं प्राप्तं राज्यं त्रिंशत्समाः कृतम् । देवाङ्गना वीरमती शक्रेण प्रेषिता तदा ॥११
गन्धर्वसेनं सम्प्राप्य पुत्ररत्नमजीजनत् । सुतस्य जन्मकाले तु नभसः पुष्पवृष्टयः ॥१२
पेतुर्दुन्दुभयो नेदुर्वान्ति वाताः सुखप्रदाः । शिवदृष्टिर्द्विजो नाम शिष्यैस्सार्धं वनं गतः ॥१३
विंशद्भिः कर्मयोगं च समाराध्य शिवोऽभवत् । पूर्णे त्रिंशच्छते वर्षे कलौ प्राप्ते भयङ्करे ॥१४
शकानां च विनाशार्थमार्यधर्मविवृद्धये । जातश्शिवाज्ञया सोऽपि कैलासाद्गुह्यकालयात् ॥१५

---

निर्माण कला के सौन्दर्य से पूर्ण और चारों वर्णों के मनुष्यों से युक्त था, अपना निवास स्थान बनाकर सुख का अनुभव करने लगा। और शुक्ल नामक भूपाल ने आनर्त प्रदेश के द्वारका नामक नगर में रहकर सुख का अनुभव किया। १-४

**शौनक ने कहा**—महाभाग ! अग्निद्वारा उत्पन्न राजाओं का, जिन्होंने सम्मानपूर्वक राज्य का उपभोग किया है, वर्णन करने की कृपा कीजिये। तत्पश्चात् सूत जी ने कहा

विक्रमादित्यनामानं पिता कृत्वा मुमोद ह । स बालोऽपि महाप्राज्ञः पितृमातृप्रियङ्करः ॥१६
पञ्चवर्षे वयः प्राप्ते तपसोऽर्थे वनं गतः । द्वादशाब्दं प्रयत्नेन विक्रमेण कृतं तपः ॥१७
पश्चादम्बावतीं दिव्यां पुरीं यातः श्रियान्वितः । दिव्यं सिंहासनं रम्यं द्वात्रिंशन्मूर्तिसंयुतम् ॥१८
शिवेन प्रेषितं सोऽपि तस्मै पदमग्रहीत् । वैतालस्तस्य रक्षार्थं पार्वत्या निर्मितो गतः ॥१९
एकदा स नृपो वीरो महाकालेश्वरस्थलम् । गत्वा सम्पूजयामास देवदेवं पिनाकिनम् ॥२०
सभा धर्ममयी तत्र निर्मिता व्यूहविस्तरा । नानाधातुकृतस्तम्भा नानामणिविभूषिता ॥२१
नानाद्रुमलताकीर्णा पुष्पवल्लीभिरन्विता । तत्र सिंहासनं दिव्यं स्थापितं तेन शौनक ॥२२
आहूय ब्राह्मणान्मुख्यान्वेदवेदाङ्गपारगान् । पूजयित्वा विधानेन धर्मगाथामथाऽश्रृणोत् ॥२३
एतस्मिन्नन्तरे तत्र वैतालो नाम देवता । स कृत्वा ब्राह्मणं रूपं जयाशीर्भिः प्रशस्य तम् ॥२४
उपविश्यासने विप्रो राजानमिदमब्रवीत् । यदि ते श्रवणे श्रद्धा विक्रमादित्यभूपते ॥२५
वर्णयामि महाख्यानमितिहाससमुच्चयम् ॥२६

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये
कलियुगसम्भूतरविशशिवंशभूपवर्णनं नाम सप्तमोऽध्यायः ।७

॥ इति प्रथमखण्डं सम्पूर्णम् ॥ ।१

---

शिव की आज्ञा से गुह्यकों के यहाँ से पुनः प्रत्यक्ष होना पड़ा ।५-१५। पिता ने उस पुत्र का 'विक्रमादित्य' नामकरण करके अत्यन्त प्रसन्नता प्रकट की । वह बालक भी महाबुद्धिमान् एवं अपने पिता-माता का अत्यन्त प्रिय करने वाला हुआ । पाँच वर्ष की अवस्था में उसने तप करने के लिए वन-प्रस्थान किया । बारह वर्ष तक दृढ़ प्रयत्न एवं विक्रम पूर्वक तप करने के उपरांत श्री सम्पन्न होकर वह अम्बावती नामक दिव्य पुरी में गया । वहाँ एक रमणीक दिव्य सिंहासन, जिसमें बत्तीस मूर्तियाँ (कठपुतरी) बनी हुई थी,

# द्वितीयखण्डम्

## अथ प्रथमोऽध्यायः

## कलियुगीयेतिहाससमुच्चयवर्णनम्

### सूत उवाच

इत्युक्तस्स तु वैतालो महाकालेश्वरस्थितः । शिवं मनसि संस्थाप्य राजानमिदमब्रवीत् ।।१
विक्रमादित्यभूपाल शृणु गाथां मनोरमाम् । वाराणसी पुरी रम्या महेशो यत्र तिष्ठति ।।२
चातुर्वर्ण्यप्रजा यत्र प्रतापमुकुटो नृपः । महादेवी च महिषी धर्मज्ञस्य महीपतेः ।।३
तत्पुत्रो वज्रमुकुटो मन्त्रिणः सुतवल्लभाः । षोडशाब्देऽथ सम्प्राप्ते हयारूढो वनं गतः ।।४
अमात्यतनयश्चैव बुद्धिदक्ष इति श्रुतः । हयारूढो गतः सार्धं समानवयसा वने ।।५
स दृष्ट्वा विपिनं रम्यं मृगपक्षिसमन्वितम् । मुमोद वज्रमुकुटः कामाशयवशं गतः ।।६
तत्र दिव्यं सरो रम्यं नानापक्षिनिनादितम् । तस्य कूले शिवस्थानं मुनिवृन्दैः प्रपूजितम् ।।७
दृष्ट्वा तत्र गतौ वीरौ परमानन्दमापतुः। एतस्मिन्नन्तरे भूपे करणाटक भूपते ।।८
दन्तवक्रस्य तनया नाम्ना पद्मावती मता । कामदेवं नमस्कृत्य कामिनी कामरूपिणी ।।९
चिक्रीड सखिभिः क्रीडां सरोमध्ये मनोहरा । तदा तु वज्रमुकुटो मन्दिरादागतो बहिः ।।१०

---

# दूसरा खण्ड

## अध्याय १

कलियुग के इतिहास समुच्चय का वर्णन

दृष्ट्वा पद्मावतीं बालां तुल्यरूपगुणान्विताम् । मूर्च्छितः पतितो भूमौ सा दृष्ट्वा सा तु मुमोह वै ॥ ११
प्रबुद्धो वज्रमुकुटो मां पाहि शिवशंकर । इत्युक्त्वा भूपतनयः पुनर्बालां ददर्श ह ॥ १२
शिरसः पद्मकुसुमं सा गृहीत्वा तु कर्णयोः । कृत्वा चखान दशनैः पादयोर्दधती पुनः ॥ १३
पुनर्गृहीत्वा तत्पुष्पं हृदये सम्प्रवेशितम् । इति भावं च सा कृत्वाऽऽलिभिः सार्धं ययौ गृहम् ॥ १४
तीर्थार्थं च समं पित्रा सम्प्राप्ता गिरिजावने । तस्यां गतायां स नृपो मारबाणेन पीडितः ॥ १५
महतीं मानसीं पीडां प्राप्तवान्मोहमागतः । उन्मादीव ततो भूत्वा खाद्यपानविवर्जितः ॥ १६
ध्यात्वा पद्मावतीं बालां मौनव्रतमचीकरत् । तदा कोलाहलो जातः प्रतापमुकुटान्तिके ॥ १७
कुमारः कां दशां प्राप्त इति हाहेति सर्वतः । त्रिदिनान्ते मन्त्रिसुतो बुद्धिदक्षो विशारदः ॥ १८
अब्रवीद्वज्रमुकुटं सत्यं कथय भूपते । स आह कारणं सर्वं यथा जातं सरोवरे ॥ १९
तच्छ्रुत्वा बुद्धिदक्षश्च विहस्याह महीपतिम् । महाकष्टेन सा देवी मित्रत्वं हि गमिष्यति ॥ २०
करणाटकभूपस्य दन्तवक्रस्य सा सुता । पद्मावतीति विख्याता दधती त्वां स्वमानसे ॥ २१
पुष्पभावेन ज्ञात्वाहं त्वां नयामि तदन्तिके । इत्युक्त्वा तस्य पितरं प्रतापमुकुटं प्रति ॥ २२
आहाज्ञां देहि भूपाल यास्येहं कारणाटके । त्वत्सुतस्य चिकित्सार्थं स वज्रमुकुटोऽचिरम् ॥ २३
आयामि नाऽत्र सन्देहो यदि जीवयसे सुतम् । तथेति मत्वा स नृपः प्रादात्पुत्रं च मन्त्रिणे ॥ २४

---

किया । उस समय वज्रमुकुट मंदिर से बाहर निकलकर कुमारी पद्मावती को, जो रूप गुण में उसके अनुरूप थी, देखकर मूर्च्छित होकर भूमि में गिर गया, और वह कुमारी भी राजकुमार को देखकर मोहित हो गई। चैतन्य होने पर वज्रमुकुट ने कहा—शिव, शंकर ! मेरी रक्षा करो ! पश्चात् पुनः राजकुमार ने उस कामिनी की ओर देखा ।७-१२। उस समय राजकुमारी ने शिर से कमल पुष्प लेकर उसे कानों में लगाकर दाँतों से काटकर अपने दोनों चरणों के नीचे रख लिया, पुनः उसे उठाकर हृदय (चोली) के भीतर रख लिया । इस

हयारूढौ गतौ शीघ्रं दन्तवक्रस्य पत्तने । काचिद्वृद्धा स्थिता तत्र तस्या गेहं च तौ गतौ ॥२५
बहुद्रव्यं ददौ तस्यै बुद्धिदक्षो विशारदः। ऊषतुर्मन्दिरे तस्मिन्रात्रिं घोरतमोवृताम् ॥२६
प्रातः काले तु सा वृद्धा गच्छन्ती राजमन्दिरम् । तामाह मन्त्रितनयः शृणु मातर्वचो मम ॥२७
पद्मावतीं च सम्प्राप्यैकान्ते मद्वचनं वद । ज्येष्ठशुक्लस्य पञ्चम्यामिन्दुवारे सरोवरे ॥२८
यो दृष्टः पुरुषो रम्यस्त्वदर्थे समुपागतः । इति श्रुत्वा ययौ वृद्धा पद्मं तस्यै न्यवेदयत् ॥२९
रुष्टा पद्मावती प्राह चन्दनार्द्राङ्गुलीयिका । गच्छ गच्छ महादुष्टे तलेनोरस्यताडयत् ॥३०
अङ्गुलीभिः कपोलौ च तस्याः स्पृष्ट्वा ययौ गृहम् । सा तु वृद्धा बुद्धिदक्षं सर्वं भावं न्यवेदयत् ॥३१
समित्रं दुःखितं प्राह शृणु मित्र शुचं त्यज । त्वामाह भूपतेः कन्या प्राणप्रिय वचः शृणु ॥३२
त्वदर्थे ताडितं वक्षः कदा मित्रं भविष्यसि । श्रुत्वा तन्मधुरं वाक्यं रजो देहे समागतम् ॥३३
रजस्वलान्ते भो मित्र तवास्यं चुम्बितास्म्यहम् । इति श्रुत्वा भूपसुतः परमानन्दमाययौ ॥३४
त्रिदिनान्ते तु सा वृद्धा पद्मावत्यै न्यवेदयेत् । त्वामुत्सुकः स भूपालस्तव दर्शनलालसः ॥३५
तं भजस्वाद्य सुश्रोणि सफलं जीवनं कुरु । इति श्रुत्वा महाहृष्टा सा मस्यार्द्राङ्गुलीयकम् ॥३६
गवाक्षद्वारि निष्कास्य तले पृष्ठे च ताडिता । तथैव वृद्धा तं प्राप्य मन्त्रिणं चाब्रवीद्वचः ॥३७

---

स्वीकार कीजिये। ऐसी बातें सुनकर राजा ने शीघ्रतया उसे स्वीकार कर अपने पुत्र को उसे सौंप दिया। वे दोनों युवक घोड़े पर सवार होकर राजा दन्तवक्र के नगर को चल पड़े। वहाँ पहुँचकर किसी वृद्धा स्त्री के घर ठहर गये। कार्य-निपुण बुद्धिदक्ष ने उस वृद्धा स्त्री को बहुत-सा द्रव्य देकर उसी के घर में उस घोर अंधकार की रात्रि को व्यतीत किया।२१-२६। प्रातः काल जब वह वृद्धा राजा के यहाँ जाने को प्रस्तुत हुई तो मंत्रि-पुत्र (बुद्धिदक्ष) ने उससे कहा—माँ एक बात मेरी भी सुन लो! पद्मावती के पास पहुँच कर एकान्त में उससे कहना कि—ज्येष्ठ शुक्ल पञ्चमी चन्द्रवार को जिस सुन्दर पुरुष को देखा था,

प्रसन्नो बुद्धिदक्षश्च मित्रं प्राह शृणुष्व भोः । पश्चिमे दिशि भोः स्वामिन्गवाक्षं तव निर्मितम् ।।३८
अर्द्धरात्रे तु सम्प्राप्य भज मां कामविह्वलाम् । श्रुत्वा तद्वज्रमुकुटः प्रियादर्शनलालसः ।।३९
ययौ शीघ्रं महाकामी रमणीं तामरामयत् । मासान्ते कामशिथिलो मित्रदर्शनलालसः ।।४०
पद्मावतीं प्रियां प्राह शृणु वाक्यं वरानने । येन प्राप्तवती मह्यं त्वं सुभ्रूः सुरदुर्लभा ।।४१
तन्मित्रं बुद्धिदक्षश्च किं नु तिष्ठति साम्प्रतम् । आज्ञां देहि प्रिये मह्यं दृष्ट्वा यास्यामि तेऽन्तिकम् ।।४२
इति श्रुत्वा वचस्तस्य निष्ठुरं कुलिशोपमम् । मिष्टान्नं सविषं कृत्वा मन्त्रिणे सा न्यवेदयत् ।।४३
तदा तु बुद्धिदक्षश्च चित्रगुप्तप्रपूजकः । ज्ञात्वा तत्कारणं सर्वं न तु भक्षितवान्स्वयम् ।।४४
एतस्मिन्नन्तरे प्राप्तो भूपतिस्त्वरयान्वितः । विवेकवन्तं मित्रं तं दृष्ट्वा प्राह रुषान्वितः ।।४५
कस्मान्न खादितं मित्र भोजनं मत्प्रियाकृतम् । विहस्य बुद्धिदक्षस्तु सारमेये ददौ हि तत् ।।४६
भुक्त्वा स मरणं प्राप्तः स दृष्ट्वा विस्मितो नृपः । स्त्रीचरित्रं च विज्ञाय स्नेहं त्यक्त्वाऽब्रवीत्तु तम् ।।४७
मित्र गच्छ गृहं शीघ्रं मया त्यक्ता च पापिनी । स आह शृणु भूपाल गच्छ शीघ्रं प्रियान्तिकम् ।।४८
तदलङ्कारमाहृत्य त्रिशूलं कुरु जानुनि । प्रसुप्तां त्यज भो मित्र या हि त्वं मा विचारय ।।४९
इति श्रुत्वा ययौ भूपस्तथा कृत्वा समागतः । स्वमित्रेण ययौ सार्धं स्मशाने रुद्रमण्डपे ।।५०

---

को सुनाया ।२७-३७। प्रसन्न होकर बुद्धिदक्ष ने मित्र से कहा—स्वामिन् ! पश्चिम दिशा की खिड़की तुम्हारे मार्ग के लिए निश्चित है, उसने कहा है उसी मार्ग से आधीरात के समय आकर मेरी कामपीड़ा की शान्ति के लिए मेरा आलिङ्गन करो । इसे सुन कर (अपनी) प्रिया का दर्शनाभिलाषी एवं महाकामी उस वज्र- मुकुट ने शीघ्रतया वहां पहुंचकर उस रमणी के साथ रमण किया । एक मास के उपरांत काम से शिथिल होने पर उसने अपने मित्र के दर्शन के लिए अभिलाषा प्रकट करते हुए पद्मावती से

शिष्यं कृत्वा नृपं तं स योगरूपो हि भूषणम् । विक्रयार्थं ददौ तस्मै स्वमित्राय स बुद्धिमान् ।।५१
स वज्रमुकुटो मत्वा तदाज्ञां नगरं गतः । चोरोयमिति तं मत्वा बद्धा राज्ञो हि रक्षिणः ।५२
शीघ्रं निवेदयामासुर्दन्तवक्त्रस्तमब्रवीत् । क्व प्राप्तं भूषणं रम्यं सर्वं कथय पूरुष ।।५३
जटिलः प्राह भो राजञ्श्मशाने मद्गुरुः स्थितः । तेन दत्तं विक्रयार्थं भूषणं स्वर्णगुण्ठितम् ।।५४
इति श्रुत्वा स नृपतिस्तूर्णमाहूय तद्गुरुम् । भूषणं पृष्टवान् राजा योगी प्राह शृणुष्व भोः ।।५५
श्मशाने सधितं मन्त्रं मया योगिस्वरूपिणा । पिशाची प्रापिता काचित्तस्याश्चिह्नं मया कृतम् ।।५६
वामजानुनि शूलेन तया दत्तं हि भूषणम् । ज्ञात्वा तत्कारणं राजा सुता निष्कासिता गृहात् ।।५७
स वज्रमुकुटस्तां तु गृहीत्वा गृहमाययौ । विहस्य प्राह वैतालः शृणु विक्रमभूपते ।।५८
कस्मै पापं महत्प्राप्तं चतुर्णां मे वदाधुना ।।

## सूत उवाच

इति श्रुत्वा वचस्तस्य विक्रमो नाम भूपतिः ।।५९
विहस्य भार्गवं प्राह प्राप्तं पापं हि भूपतेः । मित्रकार्यममात्येन स्वामिकार्यं च रक्षिभिः ।।६०
भूपपुत्रेणार्थसिद्धं कृतं तस्माच्च भूपतेः । महत्पापं च सम्प्राप्तं तेनासौ नरकं गतः ।।६१
रजोवतीं सुतां दृष्ट्वा न विवाहेत यो नरः । स पापी नरकं याति षष्टिवर्षसहस्रकम् ।।६२
गान्धर्वं च विवाहं वै कामिन्या च कृतं यया । तस्या विघ्नकरो यो वै स पापी यमपीडितः ।।६३

---

उस राजा को शिष्य बनाया, पश्चात् उस बुद्धिमान् ने उस आभूषण को विक्रयार्थ अपने मित्र को सौंप दिया। बज्रमुकुट भी उस आज्ञा को शिरोधार्य कर नगर में पहुँच गया। उसी बीच राजा के रक्षक (सिपाही) उसे चोर समझ बाँधकर राजा के सामने उपस्थित किये। राजा दन्तवक्त्र उससे बोले—हे मनुष्य ! यह सुन्दर आभूषण तुम्हें कहाँ कैसे प्राप्त हुआ, सब बातें मुझसे कहो ! उस जटाधारी ने

अदृष्टदोषां यः कन्यां विवेकेन विना त्यजेत् । स पापी नरकं याति लक्षवर्षप्रमाणकम् ॥६४
इति श्रुत्वा स वैतालो धर्मगाथां नृपेरिताम् । प्रसन्नहृदयः प्राह भूपतिं धर्मतत्परम् ॥६५

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये
कलियुगीयेतिहाससमुच्चयवर्णनं नाम प्रथमोऽध्यायः ॥१

# द्वितीयोऽध्यायः

## कलियुगेतिहाससमुच्चयवर्णनम्

### सूत उवाच

प्रसन्नमनसं भूपं महासिंहासने स्थितम् । द्विजवर्यः स वैतालो वचः प्राह प्रसन्नधीः ॥१
एकदा यमुनातीरे धर्मस्थलपुरी शुभा । धनधान्यसमायुक्ता चतुर्वर्णसमन्विता ॥२
गुणाधिपो महीपालस्तत्र राज्यं चकार वै । हरिशर्मा पुरोधास्तु स्नानपूजनतत्परः ॥३
तस्य पत्नी सुशीला च पातिव्रतपरायणा । सत्यशीलः सुतो जातो विद्याध्ययनतत्परः ॥४
तस्यानुजा मधुमती शीलरूपगुणान्विता । द्वादशाब्दवयः प्राप्ते विवाहार्थं पिता यदा ॥५
भ्राता बभ्राम तौ सर्वं चिनुतश्च सुतावरम् । कदाचिद्राजपुत्रस्य विवाहे समतो द्विजः ॥६
पठनार्थे तु काश्यां वै सत्यशीलः स्वयं गतः । एतस्मिन्नन्तरे राजन्द्विजः कश्चित्समागतः ॥७

---

होता है, वह पापी यमराज द्वारा दंडित होता है, विवेकहीन होकर उसके परित्याग करने पर उस पापी को एक लक्ष वर्ष तक नरक-यातना का अनुभव करना पड़ता है। इस मार्मिक गाथा को सुनकर, जिसे राजा ने विवेकपूर्ण बताया था, प्रसन्न होकर उस बैताल ने उस धार्मिक राजा से कहा—५९-६५

वामनो नाम विख्यातो रूपशीलवयोवृतः । सुता मधुमती तं च दृष्ट्वा कामातुराऽभवत् ॥८
भोजनं छादनं पानं स्वप्नं त्यक्त्वा च विह्वला । चकोरीव विना चन्द्रं कामबाणप्रपीडिता ॥९
दृष्ट्वा सुशीला तं बाला वामनं ब्राह्मणं तथा । वारयामास ताम्बूलैः स्वर्णद्रव्यसमन्वितैः ॥१०
हरिशर्मा प्रयोगे च द्विजं दृष्ट्वा त्रिविक्रमम् । वेदवेदाङ्गतत्त्वज्ञं सुतार्थेऽवरयत्तदा ॥११
सत्यशीलस्तु काश्यां वै गुरुपुत्रं च केशवम् । वरित्वा तं भगिन्यर्थे ययौ गेहं मुदान्वितः ॥१२
माघकृष्णत्रयोदश्यां भृगौ लग्नं शुभं स्मृतम् । त्रयो विप्रास्तदा प्राप्ताः कन्यार्थं रूपमोहिताः ॥१३
तस्मिन्काले तु सा कन्या भुजङ्गेनैव दंशिता । मृता प्रेतत्वमापन्ना पूर्वकर्मप्रभावतः ॥१४
तदा ते ब्राह्मणः यत्नं कारयामासुरुत्तरम् । न जीवनवती बाला गरलेन विमोहिता ॥१५
हरिशर्मा तु तत्सर्वं कृत्वा वेदविधानतः । आययौ मन्दिरं राजन्सुतागुणविमोहितः ॥१६
त्रिविक्रमस्तु बहुधा दुःखं कृत्वा स्मरानुगः । कन्थाधारी यतिर्भूत्वा देशाद्देशान्तरं ययौ ॥१७
केशवस्तु महादुःखी प्रियास्थीनि गृहीतवान् । तीर्थात्तीर्थान्तरं प्राप्तः कामबाणेन पीडितः ॥१८
भस्मग्राही वामनस्तु विरहाग्निप्रपीडितः । तस्थौ चितायां कामार्तः पत्नीध्यानपरायणः ॥१९
एकदा सरयूतीरे लक्ष्मणाख्यपुरे शुभे । त्रिविक्रमस्तु भक्षार्थे सम्प्राप्तो द्विजमन्दिरे ॥२०
तस्मिन्दिने रामशर्मा शिवध्यानपरायणः । यतिनं वरयामास भोजनार्थं स्वमन्दिरे ॥२१

---

समय वामन नामक एक ब्राह्मण, जो रूप, शील एवं वयस्क था, हरिशर्मा के यहाँ आ पहुँचा । मधुमती कन्या उसे देखकर कामातुर हो गई उसने व्याकुल होकर भोजन, वस्त्र, पान और शयन का त्यागकर दिया केवल चन्द्र के वियोग में चकोरी की भाँति कामबाण की पीड़ा का अनुभव करने लगी ।१-९। सुशीला ने अपनी पुत्री की अवस्था और उस वामन ब्राह्मण को देखकर कुछ स्वर्ण द्रव्य के साथ ताम्बूल प्रदान द्वारा उसका वरण कर लिया । हरिशर्मा ने प्रयाग में किसी त्रिविक्रम नामक ब्राह्मण को देखकर, जो वेद और

तस्य पत्नी विशालाक्षी रचित्वा बहुभोजनम् । आहूय यतिनं राजन्पात्रमालभमाकरोत् ।।२२
तस्मिन्काले च तद्बालो मृतः पापवशंः गतः । अरोदीत्तस्य सैरन्ध्री विशालाक्ष्यपि भर्त्सिता ।।२३
न रोदनं त्यक्तवती पुत्रशोकाग्नितापिता । रामशर्मा तदा प्राप्तो मन्त्रं सञ्जीवनं शुभम् ।।२४
जपित्वा मार्जनं कृत्वा जीवयामास बालकम् । विनयावनतो विप्रस्तं च संन्यासिनं तदा ।।२५
भोजनं कारयित्वा तु मन्त्रं सञ्जीवनं ददौ । त्रिविक्रमस्तु तं मन्त्रं पठित्वा यमुनातटे ।।२६
प्राप्तवान्यत्र सा नारी दाहिता हरिशर्मणा । एतस्मिन्नन्तरे तत्र राजपुत्रो मृतिं गतः ।।२७
दाहितस्तनयः पित्रा शोककर्त्रा तदामुना । जीवनं प्राप्तवान्बालस्तस्य मन्त्रप्रभावतः ।।२८
गुणाधिपस्य तनयो राज्ञो धर्मस्थलीपतेः । त्रिविक्रमं वचः प्राह वीरबाहुर्महाबलः ।।२९
जीवनं दत्तवान्मह्यं वरयाद्य वरं मम । स विप्रः प्राह भो राजन्केशवो नाम यो द्विजः ।।३०
गृहीत्वास्थि गतस्तीर्थे तमन्वेषय मा चिरम् । वीरबाहुस्तथा मत्वा दूतमार्गेण तं प्रति ।।३१
प्राप्तस्तं कथयामास यथा प्राप्तं हि जीवनम् । इति श्रुत्वा वचस्तस्य केशवोऽस्थिसमन्वितः ।।३२
प्रगत्यास्थीनि सर्वाणि ददौ तस्मै द्विजातये । पुनः सञ्जीविता बाला केशवादीन्वचोऽब्रवीत् ।।३३
योग्या धर्मेण यस्याहं तस्मै प्रायामि धर्मिणे । इति श्रुत्वा वचस्तस्य मौनव्रतस्त्रयः स्थिताः ।।३४
अतस्त्वं विक्रमादित्य धर्मज्ञ कथयस्व मे । कस्मै योग्या च सा बाला नाम्ना मधुमती शुभा ।।३५

---

उस यती (संन्यासी) को बुलाया था । उनकी पत्नी विशालाक्षी अनेक भाँति के भोजन पात्र में आये हुए यति के सम्मुख रख रही थी, कि राजन् ! उसी समय उसका पुत्र अपने कर्म के प्रभाव से मृतक हो गया । पश्चात् उनकी सहचरी विशालाक्षी ने जब भर्त्सना करने पर भी पुत्रशोक से संतप्त होने के कारण रुदन करना बन्द नहीं किया । तब रामशर्मा ने संजीवनी मंत्र की प्राप्ति करके उसके जप और संमार्जन द्वारा ... होकर उस ब्राह्मण ने उस संन्यासी को भोजन कराकर उसे

### सूत उवाच

विहस्य विक्रमादित्यो वैतालं प्राह नम्रधीः । योग्या मधुमती नारी वामनाय द्विजन्मने ।।३६
प्राणदाता तु यो विप्रः पितेव गुणतत्परः । अस्थिदाता तु यो विप्रो भ्रातृतुल्यस्स वेदवित् ।।३७

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये
कलियुगीयेतिहाससमुच्चयोनाम द्वितीयोऽध्यायः ।२

# अथ तृतीयोऽध्यायः

## कलियुगभूपाख्यानेतिहाससमुच्चयवर्णनम्

### सूत उवाच

विप्रवर्य महाभाग शृणु गाथां मनोरमाम् । वैतालो भूपतिश्रेष्ठं पुनर्विक्रममब्रवीत् ।।१
वर्द्धवन्नगरे रम्ये नानाजननिषेविते । तत्राभवन्महीपालो रूपसेनो महाबलः ।।२
विद्वन्माला प्रिया तस्य पतिसेवापरायणा । एकदा क्षत्रियः कश्चिन्नाम्ना वीरवरः स्मृतः ।।३
पुत्रकन्यासपत्नीको वृत्त्यर्थं समुपागतः । विनयावनतो भूत्वा रूपसेनं महीपतिम् ।।४
किञ्चिच्छ्रुत्वा ददौ स्वर्णं सहस्रं प्रत्यहं नृप । वीरसेनस्तु तल्लब्ध्वा वह्नौ तीर्थे द्विजातिषु ।।५
व्ययं कृत्वा तु तच्छेषं स कुल्ये भुक्तवान्स्वयम् । एवं वर्षे गते राजन्राजलक्ष्मीः शिवाज्ञया ।।६

---

**सूत जी बोले**—नम्रता पूर्वक राजा विक्रमादित्य ने हँसकर वैताल से कहा—वह मधुमती कन्या उस वामन नामक ब्राह्मण की स्त्री होने के योग्य है । क्योंकि प्राण देने वाला पिता के समान और अस्थि देने वाला, भ्राता के समान होता है ।३६-३७

श्री भविष्य महापुराण के प्रतिसर्ग पर्व में कलियुगीय इतिहाससमुच्चय नामक...

परीक्षार्थं श्मशाने च रोदनं बहु कुर्वती । अर्धरात्रे तदा राजा बुद्ध्वा प्राह स्वसेवकम् ॥७
गच्छ वीरवर त्वं वै यतोऽसौ श्रूयते रवः । ज्ञात्वा तत्कारणं सर्वं मह्यं शीघ्रं निवेदय ॥८
इति श्रुत्वा वीरवरः शस्त्रास्त्रकुशलो बली । स तत्र गत्वा यत्रास्ते राजलक्ष्मीः शुभानना ॥९
श्लक्ष्णं वचश्च तामाह किमर्थं रोदने स्थिता । महत्कष्टं च किं प्राप्तं कारणं देवि मे वद ॥१०
इति श्रुत्वा राजलक्ष्मीर्वीरसेनं तमब्रवीत् । राजलक्ष्मीं च मां विद्धि रूपसेनस्य भूपतेः ॥११
मासान्ते प्रलयं यास्ये तस्माच्छोचामि भो बलिन् । स आह शृणु भो देवि त्वदल्पायुस्समीरितम् ॥
केन पुण्येन दीर्घायुस्त्वं भवेः कारणं वद ॥१२

## देव्युवाच

महाबाहो महाप्राज्ञ यदि ते तनयस्य वै ॥१३
कपालमर्पय त्वं च चण्डिकायै तदानघ । दीर्घायुर्भविता चाहं स्वामिकार्यं प्रसाधय ॥१४
इति श्रुत्वा वीरवरो मन्दिरे स्वयमागतः । पत्नीं प्राह प्रसन्नात्मा सुतं देव्यै निवेदय ॥१५
तथेत्युक्त्वा तु सा साध्वी तनयं प्राह निर्भया । राज्ञोऽर्थे तव देहं वै पुत्र पासि कुरुष्व तत् ॥१६
तथा मत्वा तु तत्पुत्रो भगिन्या मातृसंयुतः । चण्डिकाभवनं प्राप्याब्रवीत्स्वपितरं तदा ॥१७
भोस्तात मे कपालं च चण्डिकायै समर्पय । दीर्घायुर्येन यत्नेन राजलक्ष्मीश्च तत्कुरु ॥१८

---

के व्यतीत होने के उपरांत भगवान् शिव की आज्ञा शिरोधार्यकर राजलक्ष्मी उस (वीरवर) की परीक्षा के लिए श्मशान में जाकर अत्यन्त रुदन करने लगी । आधी रात के समय राजा जागकर अपने सेवक से कहा—वीरवर ! जाओ इस (रुदन की) ध्वनि का, जिसे तुम सुन रहे हो, कारण का भलीभाँति पता लगाकर शीघ्र मुझसे कहो । ऐसा सुनकर शस्त्रास्त्र के निपुण एवं बली उस वीरवर ने वहाँ जाकर जहाँ

इति श्रुत्वा वीरसेनः शिरश्छित्त्वा समर्पयत् । तस्यानुजा मृता तत्र तथा माता तथा पिता ।।१९
दृष्ट्वा तद्रूपसेनस्तु कारणं सर्वमादितः । सेवकं सत्यसन्धं च मत्वा तु स्वशिरोऽर्पयत् ।।२०
तदा प्रसन्ना सा देवी नृपमुज्जीव्य साब्रवीत् । वरं वरय भूपाल यथेष्टं शीघ्रमाप्नुयाः ।।२१
स आह वीरसेनस्तु सकुलो जीवमाप्नुयात् । तथेत्युक्त्वा तु सा देवी तत्रैवान्तर्हिताभवत् ।।२२
रूपसेनः प्रसन्नात्मा स्वसुतां कामरूपिणीम् । ददौ सुताय वैतालो नृपतिं प्राह विस्मितः ।।
मुख्यस्नेहं कृतं केन तेषां मध्ये वदस्व मे ।।२३

## राजोवाच

मुख्यस्नेहं कृतं राज्ञा दासार्थे स्वतनुं ददौ । स्वर्णस्नेही वीरवरो धर्मप्रीतिः पतिव्रता ।।
बन्धुप्रीतिश्च भगिनी पितृस्नेही तु पुत्रकः ।।२४
महान्स्नेहः कृतो राज्ञा रूपसेनेन धीमता ।।२५

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये
कलियुगीयेतिहाससमुच्चयोनाम तृतीयोऽध्यायः ।३

---

कार्य हम लोगों को प्रयत्न पूर्वक करना चाहिए। ऐसा सुनकर वीरसेन ने उसका शिर काटकर देवी को अर्पित कर दिया। तत्पश्चात् उसी प्रकार क्रमशः उसकी भगिनी, माता और पिता सभी लोग मृतक हो गये। आदि से अंत तक समस्त कारण को जानकर राजा रूपसेन ने अपने उस सेवक को सत्यवक्ता समझते हुए, अपना भी शिर अर्पित कर दिया। उस समय प्रसन्न होकर देवी ने राजा को प्राणदान देकर उससे कहा—राजन् ! यथेच्छ वरदान माँगो, मैं उसे शीघ्र देने को तैयार हूँ। राजा ने कहा—यह वीरसेन

# अथ चतुर्थोऽध्यायः

## कलियुगीयेतिहाससमुच्चयभूपाख्यानवर्णनम्

### सूत उवाच

इति श्रुत्वा स वैतालो राजानमिदमब्रबीत् । काचिद्भोगावती नाम्ना नगरी परमाद्भुता ॥१
रूपवर्मा च नृपतिस्तत्र राज्यं करोति वै । चूडामणिरिति ख्यातः शुको बुद्धिविशारदः ॥२
तस्य भूपस्य गेहे च निवसनञ्च्छुभपञ्जरे । कदाचिद्रूपवर्मा च त्रिंशदब्द उरूर्जितः ॥३
पप्रच्छ मम योग्या वै शुक काचिद्वराङ्गना । चेदास्ते तर्हि मे ब्रूहि श्रुत्वा तं चाब्रवीच्छुकः ॥४
मगधेश्वरभूपस्य कन्या चन्द्रवती शुभा । तव योग्या हि भो राजन्साम्प्रतं तां गृहाण वै ॥५
इति श्रुत्वा स नृपतिर्गणेशं द्विजसत्तमम् । प्रेषयित्वा ददौ द्रव्यं यथोद्वाह्या तथा कुरु ॥६
गणेशोऽपि गतस्तूर्णं देशे मागधके शुभे । महादेवं च सम्पूज्य चकार स्तवनं मुदा ॥७
नमः शिवाय शान्ताय सर्वाभीष्टप्रदायिने । भवाय शङ्करायैव रुद्राय सततं नमः ॥८
मृडायानन्दरूपाय सर्वदुःखहराय च ॥९
इत्युक्तवति विप्रे च तदा चन्द्रवती शुभा । कामातुराब्रवीच्चैनां नाम्ना मदनमञ्जरीम् ॥१०
मम योग्यश्च पुरुषः कश्चिदस्ति महीतले । साऽह भो रूपवर्मा च योग्यो भोगापुरीपतिः ॥११

---

# अध्याय ४

## कलियुगीय इतिहाससमुच्चय का वर्णन

इति श्रुत्वा तु सा देवी दुर्गां वाञ्छितदायिनीम् । तुष्टाव मनसा सुभ्रूर्यया जातमिदं जगत् ।।१२
नमो नमो जगन्मातर्मम कार्यप्रदायिनि । त्रिलिङ्गजननी त्वं वै वर्णमूर्तिः सनातनी ।।१३
त्वं स्वाहा त्वं स्वधा सन्ध्या नमस्तस्यै नमो नमः । नृपतिं रूपवर्माणं मत्पतिं कुरु भोः शिवे ।।१४
इति स्तुत्या प्रसन्नाभूज्जगदम्बा जगन्मयी । पितरं मगधेशं च मोहयित्वा च मातरम् ।।१५
विवाहं कारयामास मासान्ते सिद्धरूपिणी । रूपवर्मा चन्द्रवती बुभुजाते परं सुखम् ।।१६
एकस्मिन्दिवसे राजन्मेनां मदनमञ्जरीम् । नृपः प्राह विवाहं त्वं सुशुकेन कुरुष्व भोः ।।१७
मेनका प्राह भो राजन्विवाहाश्चेदृशो मताः । उत्तमाधममध्याश्च पुरुषास्त्रिविधाः स्मृताः ।।१८
तथैव त्रिविधा नारी यथा योग्यो वरो भवेत् । उत्तमा या भवेन्नारी योग्याया चाधमाय वै ।।१९
शृणु तत्कारणं राजन्मया दृष्टं यथाऽभवत् । इलापुरे वसत्येको वैश्यो लक्षपतिर्धनी ।।२०
अनपत्यो देवयाजी तस्य पत्नी पतिव्रता । बहुयत्नेन तनयस्तस्य जातो महाधमः ।।२१
द्यूतक्रीडापरो नित्यं सुरापाने रतस्तदा । वेश्यागामी महाधूर्तो नित्यं मांसाशनः खलः ।।२२
तस्य धर्मं च पितरौ समालोक्य वनं गतौ । नरं नारायणं ध्यात्वा परमं पदमापतुः ।।२३
मदपालस्तु तनयः कृत्वा सर्वधनव्ययम् । अन्यदेशे च वृत्त्यर्थं जगाम धनवर्जितः ।।२४
प्राप्तश्चन्द्रपुरे रम्ये यत्र हेमपतिः स्थितः । वृत्तान्तं कथयामास वैश्यं हेमपतिं हि सः ।।२५
देवयाजी सुतोऽहं वै स्वल्पं वै धनमाहृतम् । देशान्तरे विक्रयार्थे सिन्धुमार्गेण प्राप्तवान् ।।२६

---

करने वाली उस दुर्गा देवी का, जिसने इस जगत् का निर्माण किया है, मानसिक आराधना आरम्भ की ।१-१२। हे जगत् की माता ! आप के लिए बार-बार नमस्कार है, आप मेरे कार्य की सिद्धि करने वाली हैं । आप त्रिलिङ्ग की जननी, सनातनी वर्णमूर्ति हैं, स्वाहा, स्वधा, एवं संध्या भी आप ही हैं अतः आपको बार-बार नमस्कार है । हे शिवे ! राजा रूपवर्मा को मेरा पति कीजिये । इस प्रकार की स्तुति

महावायुप्रभावेन द्रव्यं तन्मग्नमम्भसि । तल्लज्जया न यास्येऽहं पितरं प्रति मारिष ॥२७
इति श्रुत्वा हेमपतिः स्वपत्नीं काममञ्जरीम् । वचः प्राह प्रसन्नात्मा संयोगो विधिना कृतः ॥२८
चन्द्राकान्तिं सुतां दास्ये तद्वराय त्वदाज्ञया । सामन्त्र्य दम्पती राजन्ददौ कन्यायां विधानतः ॥२९
स्वगृहे वासयामास मदपालं सुतापतिम् । मासमेकमुषित्वा तं श्वशुरं प्राह नम्रधीः ॥३०
आज्ञां देहि धनाध्यक्ष स्वगेहं यामि मा चिरम् । इति श्रुत्वा हेमपतिः स्वसुतां स्वर्णभूषिताम् ॥३१
चन्द्रकान्तिं सदासीं च तस्मै दत्त्वा गृहं ययौ । नरान्विसृज्य दुष्टात्मा शिबिकावाहकान्नृप ॥३२
दासीं हत्वा तदा पत्नीं विसृज्य धनवर्जिताम् । एकाकी प्राप्तवान्गेहं मदपालो महाधमः ॥३३
वर्षान्तरे च तत्स्वर्णं व्ययं कृत्वा कुमार्गके । बुभुक्षितः पुनः शोकं चकार बहुधा नृप ॥३४
पुनश्च श्वशुरस्यैव गृहे सम्प्राप्तवान्खलः । चन्द्रकान्तिस्तु तं दृष्ट्वा स्वपतिं प्राह नम्रधीः ॥३५
मया निवेदितं पित्रे धनं चौरैश्च लुण्ठितम् । अतस्त्वं त्यज सन्तापं चिरं वस गृहे मम ॥३६
तथेत्युक्त्वा महाधूर्त उवास कतिचिद्दिनम् । ज्ञात्वा विमोहितां पत्नीमर्द्धरात्रे तमोवृते ॥३७
हत्वा तां स ययौ गेहं गृहीत्वा बहुभूषणम् । अयोग्योऽयमतो राजन्विवाहः शुकमेनयोः ॥३८
इति श्रुत्वा शुकः प्राह भूपतिं करुणानिधिम् । विवाहं न करिष्यामि नार्य्या चाधमया सह ॥३९

---

धन लेकर समुद्री मार्ग से इस प्रदेश में विक्रयार्थ आया था । पर महावायु के झकोरे मे मेरा सम्पूर्ण द्रव्य जल में डूब गया । आर्य ! अतः लज्जावश मैं अपने माता-पिता के पास नहीं जा रहा हूँ । ऐसा सुनकर हेमपति ने प्रसन्न होकर अपनी पत्नी काम मंजरी से कहा—ब्रह्मा ने यह उत्तम सुन्दर संयोग उपस्थित किया है, तुम्हारी सम्मति प्राप्त कर मैं पुत्री चन्द्रकांति का पाणिग्रहण इससे कराना चाहता हूँ । आपस में उन दोनों ने इस प्रकार मंत्रणा करके विधान पूर्वक उसे कन्यादान दे दिया ।१९-२९। उपरांत अपने घर में ही उस जामाता मदनपाल को भी ठहराया । एक मास रहकर उसने विनम्र होकर अपने श्वसुर से

अधमा मेनका नारी श्यामाङ्गा च कुरूपिणी । उत्तमोऽहं शुको राजन्पुरुषश्च हरेत्तनुम् ।।४०
शृणु तत्कारणं भूप मया दृष्टं महोत्तमम् । नगरे काञ्चनपुरे वणिक्छङ्खपतिः श्रुतः ।।४१
तस्य पुत्रस्तु मेधावी सिन्धुगुप्तो गुणी धनी । प्रभावती प्रिया तस्य श्रीदत्तस्तत्सुतः स्मृतः ।।४२
विवाहमकरोत्तस्य जयश्रीपत्तने शुभे । सोमदत्तस्य सुतया जयलक्ष्म्या समन्वितम् ।।४३
श्रीदत्तस्तु गतो देशं वाणिज्यार्थं कुरुस्थलम् । आयाति द्वादशाब्दे तु सधनो गेहमागतः ।।४४
जयलक्ष्मीस्तु कामेन पीडिता पितृमन्दिरे । अमात्यतनयेनैव होमदत्तेन मोहिता ।।४५
दूती मार्गेण तं प्राप्य व्ययं कृत्वा धनं बहु । रमयामास सा नारी तेन सार्द्धं महाधमा ।।४६
त्रिमासान्ते च तत्स्वामी श्रीदत्तः श्वशुरालये । सम्प्राप्तः सा तु तं दृष्ट्वा महद्दुःखमुपाययौ ।।४७
अर्धरात्रे तु तन्मात्रा प्रेषिता स्वपतिं प्रति । जयलक्ष्मीश्च सम्प्राप्ता क्रोधेन स्फुरिताधरा ।।४८
बहुमानेन स्वपतिस्नेहं कृत्वालयं ययौ । तदा तु कुलटा सा च गता दूतीगृहं प्रति ।।४९
शून्यालये होमदत्तो दंशितो भुजगेन वै । सुष्वाप मरणं प्राप्य तदा बाला समागता ।।५०
वेगेन रमयामास तं जारं विषमोहितम् । पिप्पलस्थः पिशाचश्च दृष्ट्वा तां जारिणीं शुभाम् ।।५१
शवदेहं च सम्प्राप्य रमणीं तामरीरमत् । खनित्वा दशनैर्नासां पिप्पलोपरि सोऽगमत् ।।५२
कफल्लो नाम चौरस्तु दृष्ट्वा तत्कारणं तदा । कामिन्या अनुगो भूत्वा मन्दिरे तत्प्रविष्टवान् ।।५३

---

नाते कुरूपा है । राजन् ! मैं उत्तम शुक हूँ । राजन् ! मैं उस कारण को बता रहा हूँ, जिसे मैंने स्वयं देखा है । कांचनपुर नामक नगर में शंखपति नामक एक बनिया रहता था ।३०-४१। उसके पुत्र का नाम सिंधुगुप्त था, जो गुणी एवं धनी व्यक्ति था । उसकी पत्नी का नाम प्रभावती और पुत्र का श्रीदत्त नाम था । उसने जयश्री नामक नगर के निवासी सोमदत्त की पुत्री जयलक्ष्मी का पाणिग्रहण अपने पुत्र (श्रीदत्त) के

तदा तु जयलक्ष्मीश्च स्वपतिं प्राप्य दुर्भगा । चक्रे सा रोदनं गाढं सर्वे लोकाः प्रतस्थिरे ।।५४
नासाहीनां सुतां दृष्ट्वा सोमदत्तो महाधनः । बद्ध्वा जामातरं शीघ्रं राजान्तिकमुपाययौ ।।५५
नृपाज्ञया राजदूतास्तमुद्बन्धनमादधुः । तदा कफल्लः सम्प्राप्य सर्वं राज्ञे न्यवेदयत् ।।५६
मत्वा तस्य वचः सत्यं जयलक्ष्मीं महाधमाम् । रासभोपरि संस्थाप्य कृत्वा दुर्गतिरूपिणीम् ।।५७
नगरात्प्रेषयामास वनं शार्दूलसेवितम् । अतस्त्वं श्रृणु भूपाल मेनामद्योग्यिका न हि ।।५८
इत्युक्त्वा स तु वैतालो विक्रमं प्राह नम्रधीः । नारी पापाधिका वाथ पुरुषस्तद्वदस्व मे ।।५९

## विक्रम उवाच

ब्रह्मणोऽगुणरूपस्य मायावर्णस्वरूपिणी । तमो नपुंसकं ज्ञेयं त्रिलिङ्गैकं तदव्ययम् ।।६०
अव्ययं ब्रह्मणो धाम माया लिङ्गस्वरूपिणी । तया जातमिदं विश्वं तदम्बायै नमो नमः ।।६१
क्लीबा स्त्री सर्वदा श्रेष्ठा स्त्रियास्तु पुरुषस्तथा । अव्याधिकश्च पुरुषो नारी कर्माधिका मता ।।६२
क्लीबमज्ञानमधिकं कथितं पूर्वकोविदैः । कर्मैव बन्धनं पुंसां ज्ञानं निर्बन्धनं स्मृतम् ।।६३
अतः पापाधिका नारी पुरुषो हीनकिल्बिषः ।।६४

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये
कलयुगीयेतिहाससमुच्चयोनाम चतुर्थोऽध्यायः ।४

---

उस समय वह अभागिनी जयलक्ष्मी अपने पति के समीप जाकर अत्यन्त रुदन करने लगी, जिससे कि सभी लोग वहाँ पहुँच आये । महाधनी सोमदत्त ने अपनी पुत्री को नाकविहीन देखकर अपने जामाता को बाँध कर शीघ्र राजा के यहाँ पहुँचाया । राजा के आदेश से राज कर्मचारीगण उसे फाँसी पर चढ़ाना चाहते थे कि उसी समय वही कफल्ल नामक चोर ने वहाँ पहुँच कर राजा से समस्त घटना का वर्णन किया । उसकी बातें सत्य मानकर राजा ने उस महानीच जयलक्ष्मी को, विरूप करके उसकी दुर्गति की गई, गधे

# अथ पञ्चमोऽध्यायः

## कलीयुगीयेतिहाससमुच्चयवर्णनम्

### सूत उवाच

भृगुवर्य महाभाग श्रुत्वा वैताल एव सः । प्रसन्नात्मा वचः प्राह भूपतिं ज्ञानसम्पदम् ॥१
उज्जयिन्यां महाराज महाबल इति श्रुतः । चन्द्रवंशी नृपः प्राज्ञो वेदशास्त्रविशारदः ॥२
तस्य दूतो हरेर्दासः स्वामिकार्यकरः सदा । भक्तिमाला प्रिया तस्य साधुसेवापरायणा ॥३
तस्यां जाता रूपवती कन्या कमललोचना । महादेवीति विख्याता सर्वविद्याविशारदा ॥४
हरिदासं च सा प्राह शृणु तात वचो मम । मत्ताऽधिको नरो यो वै तस्मै मां तु ददस्व भोः ॥५
तथेत्युक्त्वा पिता राजन्राज्ञाहूतो गतः सभाम् । नत्वा तं नृपतिः प्राह हरिदास शृणुष्व भोः ॥६
तैलङ्गाधिपतिं गच्छ हरिश्चन्द्रं महीपतिम् । तस्य क्षेमं तथा ज्ञात्वा मां निवेदय मा चिरम् ॥७
इति श्रुत्वा द्विजः प्रागाद्धरिश्चन्द्रं महामतिम् । कुशलं वर्णयामास महाबलनृपस्य वै ॥८
श्रुत्वा प्रसन्नहृदयो हरिश्चन्द्रो महीपतिः । श्वशुरस्तस्य नृपतेः स भूयो हर्षमागतः ॥९
हरिदासं स पप्रच्छ कलेरागमनं कदा । इत्युक्तः स तु तं प्राह न्यूहश्च भविताधिकम् ॥१०
यदा राज्यं कृतं तेन कलेरागमनं तदा । ब्रह्मणोऽस्य मुखाज्जात ॐकारः सत्यपूजितः ॥११

---

# अध्याय ५

## कलीयुगीयेतिहाससमुच्चय का वर्णन

सूत जी बोले—भृगुश्रेष्ठ, महाभाग ! प्रसन्न होकर उस वैताल ने ज्ञान-निधि उस राजा

द्वितीयास्याच्च विविधा भाषा लोकविमोहिनी । जाता कलेर्हितार्थाय यमलोकहितैषिणी ।।१२
यदा धर्मं च वेदोक्तं विपरीतं हि दृश्यते । कलिराज्यं तदा ज्ञेयं म्लेच्छा यस्य प्रियाः स्मृताः ।।१३
कलिनाऽधर्ममित्रेण सर्वे देवा निराकृताः । पापस्यैव मृषा भार्या दुःखं तत्तनयः स्मृतः ।।१४
दुर्गतिस्तस्य चार्धांगी गेहे गेहे तदा भवेत् । क्रोधवश्याः नृपाः सर्वे ब्राह्मणाः कामकिङ्कराः ।।१५
लोभवश्यास्तु धनिनो महत्त्वं शूद्रका गताः । नार्यो लज्जाविहीनाश्च किङ्कराः स्वामिघातकाः ।।१६
निष्फला तु मही जाता कलौ प्राप्ते हि दृश्यते । ये हरेः शरणं प्राप्तास्ते सर्वे मुदिताः कलौ ।।१७
इति श्रुत्वा हरिश्चन्द्रो दत्त्वा तस्मै सुदक्षिणाम् । स्वगेहं प्राप्तवान्राजा विप्रस्तु शिबिरं ययौ ।।१८
एतस्मिन्नन्तरे तत्र ब्राह्मणो बुद्धिकोविदः । स्वविद्यां दर्शयामास हरिदासाय धीमते ।।१९
विमानं शीघ्रगं नाम देव्या दत्तं महोत्तमम् । मन्त्रजापात्समुद्भूतं कामजं विस्मयप्रदम् ।।२०
तस्मिन्ददर्श कन्यार्थे तदा विप्रो विमोहितः । वारित्वा तं स्वकन्यार्थं ततः स्वपुरमागतः ।।२१
हरिदासस्य तनयो मुकुन्दो नाम कोविदः । पठित्वा स्वगुरुं प्राह वृणीष्व गुरुदक्षिणाम् ।।२२
गुरुराह च शिष्यं तं शृणु वाचं मुकुन्द मे । दापय स्वस्य भगिनीं मत्पुत्राय च धीमते ।।२३
तथेत्युक्त्वा मुकुन्दस्तु स्वगेहं शीघ्रमाययौ । तस्मिन्काले महादेवी द्रौणिशिष्यं द्विजं शुभम् ।।२४
वामनं वरयामास तं विप्रं शब्दवेधिनम् । दक्षिणादिभिरभ्यर्च्य ताम्बूलेन विधानतः ।।२५

---

और (संस्कृत मिश्र) दूसरी भाषा प्रधान होगी, जो अपने अनेक रूपों से लोगों को मुग्ध करेगी । कलि का हित उसी से सम्पन्न होगा, क्योंकि वह यम-लोक का भी हित चाहेगी । जिस समय वेदोक्त धर्म विपरीत दिखायी दे, उसे कलिराज्य जानना चाहिए, क्योंकि म्लेच्छ ही उसके प्रिय होंगे, ऐसा कहा गया है । अधर्म मित्र की सहायता से कलि में समस्त देववृन्द न रहने के समान रहेंगे । पाप की मृषा (झूठ) नामक भार्या, दुःख नामक पुत्र, और दुर्गति नामक अर्द्धांगिनी प्रत्येक गृहों में निवास करेंगी । क्रोध के वशीभूत

त्रयस्ते ब्राह्मणाः प्राप्ताः सुतार्थे गुणकोविदाः । एतस्मिन्नन्तरे कामी राक्षसो दैवमोहितः ॥२६
महादेवीं जहाराशु प्राप्तो विन्ध्याचले गिरौ । तदा ते दुःखिनो भूत्वा विलेपुः कामपीडिताः ॥२७
धीमान्नाम द्विजो विद्वांस्तान्प्राह गणकोत्तमः । विन्ध्याचले गिरौ बाला चास्ते क्रव्यादवश्यगा ॥२८
स्वविमाने समारोप्य तौ द्विजौ बुद्धिकोविदः । विन्ध्याचले गिरौ प्राप्तः शब्दवेधी तदा धनुः[1] ॥२९
समारोप्य शरेणैव जघानाशु स राक्षसम् । कन्यां गृहीत्वा ते जग्मुरुज्जयिन्यां विमानगाः ॥३०
मिथो विवादवन्तस्ते दृष्ट्वा कन्यां स्मरानुगाः । कस्मै योग्या भवेत्कन्या भूप मे कृपया वद ॥३१

## सूत उवाच

इति श्रुत्वा वचस्तस्य विक्रमो नाम भूपतिः । प्रश्रयावनतः प्राह वैतालं रुद्रकिङ्करम् ॥३२
विदित्वा योऽवदत्कन्यां पितृतुल्यो द्विजो हि सः । येन प्राप्ता विमानेन स तु तद् भ्रातृकः स्मृतः ॥३३
हत्वा यो राक्षसं वीरं कन्यायोग्यो हि सोऽभवत् ॥३४

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये
कलियुगीयेतिहाससमुच्चयोनाम पञ्चमोऽध्यायः ।५

---

लिया ।१८-२५। जिस समय वे तीनों गुण-निपुण ब्राह्मण वहाँ विवाह के लिए उपस्थित हुए, उस समय दुर्भाग्य वश किसी राक्षस ने मोहित होकर उस कन्या का अपहरण करके विंध्याचल पर्वत को प्रस्थान किया । उपरांत वे विप्रवृन्द कामपीड़ित होकर अत्यन्त दुःखी होने के नाते विलाप करने लगे । उस समय धीमान् नामक एक विद्वान् ज्योतिषी ने उन लोगों से कहा—विंध्याचल पर्वत पर एक राक्षस के अधीन वह स्त्री वर्तमान है । इसे सुनकर बुद्धिकोविद ने उन दोनों ब्राह्मणों को भी अपने विमान पर

# अथ षष्ठोऽध्यायः

## कलियुगीयेतिहाससमुच्चयवर्णनम्

### सूत उवाच

पुनराह स वैतालः शृणु राजन्कथामिमाम् । ग्रामे धर्मपुरे रम्ये नानाजननिषेविते ॥१
तत्राभवन्महीपालो धर्मशीलो महोत्तमः । लज्जादेवी च महिषी तस्य भूपस्य भूपते ॥२
अन्धको नाम तन्मन्त्री न्यायशास्त्रविशारदः । कियता चैव कालेन देवीमन्दिरमुत्तमम् ॥३
धर्मशीलेन रचितं तत्र दुर्गा प्रतिष्ठिता । अपत्यार्थे भूपतिना कृतस्तत्र महोत्सवः ॥४
अर्द्धरात्रे महागौरी नृपं प्राह वृणीष्व भोः । श्रुत्वामृतमयं वाक्यं धर्मशीलो नृपोत्तमः ॥५
स्तुतिं चकार नम्रात्मा येन दुर्गा प्रसीदति ॥

### धर्मशील उवाच

एका तु प्रकृतिर्नित्या सर्ववर्णस्वरूपिणी ॥६
सा त्वं भगवती साक्षात्त्वया सर्वमिदं ततम् । त्वदाज्ञया सुरश्रेष्ठो रचित्वा लोकमुत्तमम् ॥७
महालक्ष्म्या त्वया सार्द्धं बुभुजे निर्मलं सुखम् । त्वद्भक्त्या भगवान्विष्णुस्त्रैलोक्यं ब्रह्मनिर्मितम् ॥८
पालयंश्च महालक्ष्म्या त्वया सार्द्धं सनातनि । त्वद्बलेन महादेवि त्रैलोक्यं विष्णुपालितम् ॥९

---

# अध्याय ६

## कलियुगीय इतिहास समुच्चय का वर्णन

महाकाल्या त्वया सार्द्धं भस्म कृत्वा विराजते । सर्वे देवास्तथा दैत्याः पितरो मनुजाः खगाः ।।१०
त्वल्लीलया च ते जाता जगन्मातर्नमोऽस्तु ते । इत्युक्तवन्तं नृपतिं वागुवाचाशरीरिणी ।।११
महाबलो महावीर्यस्तनयस्ते भविष्यति । तव स्तुत्या प्रसन्नाऽहं दास्यामि विविधं फलम् ।।१२
इति श्रुत्वा स नृपतिः स्वगेहं प्राप्य निर्भयः । राज्ञ्यै निवेदयामास देवीवचनमुत्तमम् ।।१३
ततः प्रभृति राजेन्द्र मूर्तौ जाता स्वयं किल । एकस्मिन्दिवसे राजन्रजकः कलिभोजनः ।।१४
काशीदासेन सहितो ग्रामं धर्मपुरं गतः । तत्र दृष्ट्वा शुभां कन्यां कामाङ्गीं नाम विश्रुताम् ।।१५
पित्रान्वितां राजमार्गे गच्छन्तीं श्रमपीडिताम् । मुमोह कामवेगेन रजकः कलिभोजनः ।।१६
कामान्धश्चण्डिकां प्राह जगन्मातः सनातनि । यदि मे भविता सुभ्रूस्तर्हि दास्यामि ते शिरः ।।१७
जातियोग्या ममैवास्ति रजकस्य सुता शुभा । इति श्रुत्वा तु सा देवी वचनं रजकस्य वै ।।१८
मोहयित्वा च पितरं तस्याः पाणिग्रहः कृतः । स सुतां कामिनीं प्राप्य प्रसन्नात्मा गृहं ययौ ।।१९
भुक्त्वा स विविधं भोगं तया सार्द्धं सुखप्रदम् । वर्षान्तरे शिरो देव्यै गत्वा शीघ्रं समर्पयत् ।।२०
काशिदासस्तु तच्छ्रुत्वा स्नेहेन त्वरितोऽगमत् । स्वशिरो दत्तवान्देव्यै कामाङ्गी पतिशोकतः ।।२१
अर्पयित्वा शिरो देव्यै देवीरूपत्वमागता । तदा प्रसन्ना सा चण्डी त्रीनुज्जीव्याब्रवीच्च तान् ।।२२
वरं वरयतामद्य यो यः कामो ह्यभीप्सितः । काशिदासस्तु तां प्राह कामाङ्गीं मां समर्पय ।।२३

---

महाकाली के साथ भस्म करके सुशोभित होती हो । समस्त देव, दैत्य, पितृगण, मनुष्य एवं पक्षी तुम्हारी ही लीला द्वारा उत्पन्न हुए हैं, अतः जगन्मातः ! तुम्हें नमस्कार है । इस भाँति स्तुति करने वाले उस राजा से आकाशवाणी द्वारा उन्होंने कहा—।६-११। महाबलवान् एवं महापराक्रमी पुत्र तुम्हारे यहाँ उत्पन्न होगा । तथा तुम्हारी स्तुति से मैं बहुत प्रसन्न हूँ अतः तुम्हें अनेक भाँति के फल प्रदान करूंगी । ऐसा सुनकर राजा ने अपने महल में पहुँचकर अपनी रानी से देवी की सभी बातें कह सुनाया । पश्चात